॥ अथ ॥

॥ श्री वल्लभाचार्य-प्रकटिताः ॥

# ॥ षोडशग्रन्थः ॥

## गायत्री भाष्यम् एवम् कारिका

संवत्- २०६६

## ॥ शिक्षाश्लोकाः ॥

यदा बहिर्मुखा यूयं भविष्यथ कथंचन ।
तदा कालप्रवाहस्था देहचित्तादयोऽप्युत ॥१॥
सर्वथा भक्षयिष्यन्ति युष्मानिति मतिर्मम ।
न लौकिकः प्रभु कृष्णो मनुते नैव लौकिकम् ॥२॥
भावस्तत्राप्यस्मदीयः सर्वस्वश्चैहिकश्च सः ।
परलोकश्च तेनायं सर्वभावेन सर्वथा ॥३॥
सेव्यः स एव गोपीशो विधास्यत्यखिलं हि नः ॥३१/२॥

मुद्रक : हेम प्रिन्टींग प्रेस , ४, लब्धी एस्टेट, प्रतापनगर, वडोदरा-४ फोन नं. : २५८०२३३

नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम् ।
लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधिम् ॥१॥
चतुर्भिश्च चतुर्भिश्च चतुर्भिश्च त्रिभिस्तथा ।
षड्भिर्विराजते योऽसो पञ्चधा हृदये मम ॥२॥

## ॥ अथ षोडशग्रन्थाः ॥

## ॥ श्री यमुनाष्टकम् ॥

नमामि यमुनामहं सकलसिद्धिहेतुं
मुदामुरारिपदपङ्कजस्फुरदमन्देरेणूत्कटाम्।तटस्थनवकाननप्रकटमोदपुष्पाम्बुना
सुरासुरसु- पूजितस्मरपितुः श्रियं बिभ्रतीम् ॥११॥कलिन्दगिरिमस्तके
पतदमन्दपूरोज्ज्वला विलासगमनोल्लसत्प्रकट गण्डशैलोन्नता।
सघोषगतिदन्तुरा समधिरूढदोलोत्तमा मुकुन्दरतिवर्धिनी जयति
पद्मबन्धोःसुता ॥२॥भुवं भुवन पावनीमधिगतामनेकस्वनैः
प्रियाभिरिवसेवितां शुकमयूरहंसादिभिः । तरङ्ग भुजकङ्कण
प्रकटमुक्तिकावालुका नितम्बतटसुन्दरीं नमत कृष्णतुर्यप्रियाम् ॥३॥

अनन्तगुणभूषिते शिवविरञ्चिदेवस्तुते घनाघननिभे सदा ध्रुवपराशराभिष्टदे ॥ विशुद्धमथुरातटे सकलगोपगोपीवृते कृपाजलधिसंश्रित मम मनः सुखं भावय ॥४॥ यया चरणपद्मजा मुररिपोः प्रियम्भावुका समागमनतोऽभवत् सकलसिद्धिदा सेवताम् । तया सदृशतमियात् कमलजासपत्नीव यद्धरिप्रियकलिन्दया मनसि मे सदा स्थीयताम् ॥५॥ नमोऽस्तु यमुने सदा तव चरित्रमत्यद्भुतं न जातु यमयातना भवित ते पयःपानतः । यमोऽपि भगिनीसुतान् कथमु हन्ति दुष्टानपि प्रियो भवति सेवनात् तव हरेर्यथा गोपिकाः ॥६॥ ममाऽस्तु तव सन्निधौ तनुनवत्वमेतावता न दुर्लभतमा रतिर्मुररिपौ मुकुन्दप्रिये । अतोऽस्तु तव लालना सुरधुनी परं सङ्गमात् तवैव भुवि कीर्तिता न तु कदापि पुष्टिस्थितैः ॥७॥ स्तुतिं तव करोति कः कमलजासपत्नि प्रिये

हरेर्यदनुसेवया भवति सौख्यमामोक्षतः । इयं तव कथाऽधिका सकल गोपिका सङ्गमःस्मरश्रमजलाणुभिः सकलगात्रजैः सङ्गमः ॥८॥ तवाऽष्टकमिदं मुदा पठति सूरसूते सदा समस्तदुरितक्षयो भवति वै मुकुन्दे रतिः । तया सकलसिद्धयो मुररिपुश्च सन्तुष्यति स्वभावविजयो भवेद् वदति वल्लभः श्रीहरेः ॥९॥

॥इति श्रीमद्वल्लभाचार्यविरचितं श्री यमुनाष्टकं सम्पूर्णम् ॥१॥

## ॥ अथ बालबोधः ॥

नत्वा हरिं सदानन्दं सर्वसिद्धान्तसङ्ग्रहम् । बालप्रबोधनार्थाय वदामि सुविनिश्चितम् ॥१॥ धर्मार्थकाममोक्षाख्याश्चत्वरोऽर्था मनीषिणाम् । जीवेश्वरविचारेण द्विधा ते हि विचारिताः ॥२॥ अलौकिकास्तु वेदोक्ताः साध्यसाधनसंयुताः । लौकिका ऋषिभिः प्रोक्तास्तथैवेश्वरशिक्षया ॥३॥

लौकिकांस्तु प्रवक्ष्यामि वेदादाद्या यतः स्थिताः ।धर्मशास्त्राणि नीतिश्च कामशास्त्राणि च क्रमात् ॥४॥ त्रिवर्गसाधकानीति न तन्निर्णय उच्यते । मोक्षे चत्वारि शास्त्राणि लौकिके परतः स्वतः ॥५॥ द्विधा द्वे द्वे स्वतस्तत्र साङ्ख्ययोगौ प्रकीर्तितौ । त्यागात्यागविभागेन साऽख्ये त्यागः प्रकीर्तितः ॥६॥ अहन्ताममतानाशे सर्वथा निरहङ्कृतौ ।स्वरुपस्थो यदा जीवः कृतार्थः स निगद्यते ॥७॥ तदर्थं प्रक्रिया काचित् पुराणेऽपि निरुपिता ।ऋषिभिर्बहुधा प्रोक्ता फलमेकमबाह्यतः ॥८॥अत्यागे योगमार्गो हि त्यागोऽपि मनसैव हि ।यमादयस्तु कर्तव्याः सिद्धे योगे कृतार्थता ॥९॥ पराश्रयेण मोक्षस्तु द्विधा सोऽपि निरुप्यते ।ब्रह्मा ब्राह्मणतां यातस्तद्रूपेण सुसेव्यते ॥१०॥ ते सर्वार्था न चाऽऽधेन शास्त्रं किञ्चिदुदीरितम् । अतः शिवश्च विष्णुश्च जगतो हितकारकौ ॥११॥

वस्तुनः स्थितिसंहारौ कार्यौ शास्त्रप्रवर्त्तकौ । ब्रह्मैव तादृशं यस्मात्
सर्वात्मकतयोदितौ ॥१२॥ निर्दोषपूर्णगुणता तत्तच्छास्त्रे तयोः कृता ।
भोगमोक्षफले दातुं शक्तौ द्वावपि यद्यपि ॥१३॥ भोगः शिवेन मोक्षस्तु
विष्णुनेतिविनिश्चयः । लोकेऽपियत् प्रभुर्भुङ्क्ते तन्न यच्छति कर्हिचित् ॥१४॥
अतिप्रियाय तदपि दीयते क्वचिदेव हि । नियतार्थ प्रदादेन तदीयत्वं
तदाश्रयः ॥१५॥ प्रत्येकं साधनं चैतद् द्वितीयार्थे महाज् श्रमः । जीवाः
स्वभावतो दुष्टा दोषाभावाय सर्वदा ॥१६॥ श्रवणादि ततः प्रेम्णा सर्वं
कार्यं हि सिध्यति । मोक्षस्तु सुलभो विष्णोर्भोगश्च शिवतस्तथा ॥१७॥
समर्पणेनाऽऽत्मनो हि तदीयत्वं भवेद् ध्रुवम् । अतदीयतया चापि
केवलश्चेत् समाश्रितः ॥१८॥ तदाश्रयतदीयत्वबुद्ध्यै किञ्चित्
समाचरेत्। स्वधर्ममनुतिष्ठन् वै भारद्वैगुण्यमन्यथा ॥१९॥ इत्येवं

कथितं सर्वं नैतज्ज्ञाने भ्रमः पुनः ॥२०॥

इति श्रीमद्वल्लभाचार्यविरचितो बालबोधः सम्पूर्ण ॥२॥

## ॥ अथ सिद्धान्तमुक्तिवली ॥

नत्वा हरिं प्रवक्ष्यामि स्वसिद्धान्तविनिश्चयम् । कृष्णसेवा सदा कार्या मानसी सा परा मता ॥१॥ चेतस्तत्प्रवणं सेवा तत्सिद्धयै तनुवित्तजा । ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधनम् ॥२॥ परं ब्रह्म तु कृष्णो हि सच्चिदानन्दकं बृहत् । द्विरुपं तद्धि सर्वं स्यादेकं तस्माद् विलक्षणम् ॥३॥ अपरं तत्र पूर्वस्मिन् वादिनो बहुधा जगुः । मायिकं सगुणं कार्यं स्वतंत्रं चेति नैकधा ॥४॥ तदेवैतत् प्रकारेण भवतीति श्रुतेर्मतम् । द्विरुपं चापि गङ्गावज् ज्ञेयं सा जलरुपिणी ॥५॥ माहात्म्यसंयुता नृणां सेवतां भुक्तिमुक्तिदा । मर्यादामार्गविधिना तथा ब्रह्मापि बुध्यताम् ॥६॥ तत्रैव देवतामूर्तिर्भक्तया

या दृश्यते क्वचित् । गङ्गायां च विशेषेण प्रवाहाभेदबुद्धये ॥७॥ प्रत्यक्षा सा न सर्वेषां प्राकाम्यं स्यात् तया जले ।विहिताच्च फलात् तद्धि प्रतीत्यापि विशिष्यते ॥८॥ यथा जलं तथा सर्वं यथा शक्ता तथा बृहत् । यथा देवी तथा कृष्णस्तत्राप्येतदिहोच्यते ॥९॥ जगत् तु त्रिविधं प्रोक्तं ब्रह्मविष्णुशिवास्ततः । देवतारुपवत् प्रोक्ता ब्रह्मणीत्थं हरिर्मतः ॥१०॥ कामचारस्तु लोकेऽस्मिन् ब्रह्मादिभ्यो न चान्यथा । परमानन्दरुपे तु कृष्णे स्वात्मनि निश्चयः ॥११॥ अतस्तु ब्रह्मवादेन कृष्णे बुद्धिर्विधीयताम् । आत्मनि ब्रह्मरुपे हि छिद्रा ब्रह्मात्मत्वावबोधने । गङ्गातीरस्थितो यद्वद् देवतां तत्र पश्यति ॥१३॥ तथा कृष्णं परंब्रह्म स्वस्मिन् ज्ञानी प्रपश्यति । संसारी यस्तु भजते स दूरस्थो यथा तथा ॥१४॥ अपेणितजलादीनामभावात् तत्र दुःखभाक् । तस्माच् छ्रीकृष्णमार्गस्थो

विमुक्तः सर्वलोकतः ॥१५॥ आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तयेत् । लोकार्थी चेद् भजेत् कृष्णं क्लिष्टो भवति सर्वथा ॥१६॥ क्लिष्टोपि चेद् भजेत् कृष्णं लोको नश्यति सर्वथा । ज्ञानाभावे पुष्टिमार्गी तिष्ठेत् पूजोत्सवादिषु ॥१७॥ मर्यादास्थस्तु गङ्गायां श्रीभागवततत्परः । अनुग्रहः पुष्टिमार्गे नियामक इतिस्थितिः ॥१८॥ उभयोस्तु क्रमेणैव पूर्वोक्तैव फलिष्यति । ज्ञानाधिको भक्तिमार्ग एवं तस्मात् निरुपितः ॥१९॥ भक्त्यभावे तु तीरस्थो यथा दुष्टैः स्वकर्मभिः । अन्यथाभवामापन्नस्तस्मात् स्थानाच्च नश्यति ॥२०॥ एवं स्वशास्त्रसर्वस्वं मया गुप्तं निरुपितम् । एतद् बुद्ध्वा विमुच्येत पुरुषः सर्वसंशयात् ॥२१॥

॥ इति श्रीमद्वल्लभाचार्यविरचिता सिद्धान्तमुक्तावली सम्पूर्णा ॥३॥

## ॥ अथ पुष्टिप्रवाहमर्यादाभेदः ॥

पुष्टिप्रवाहमर्यादा विशेषेण पृथक् पृथक् । जीवदेहक्रियाभेदैः प्रवाहेण फलेन च ॥१॥ वक्ष्यामि सर्वसन्देहा न भविष्यन्ति यच्छ्रुतेः । भक्तिमार्गस्य कथनात् पुष्टिस्तीतिनिश्चयः ॥२॥ 'द्वौ भूतसर्गा' वित्युक्तेः प्रवाहोऽपि व्यवस्थितः । वेदस्य विद्यमानत्वान् मर्यादापि व्यवस्थिता ॥३॥ कश्चिदेव हि भक्तो हि 'यो मद्भक्त' इतीरणात् । सर्वत्रोत्कर्षकथनात् पुष्टिरस्तीतिनिश्चयः ॥४॥ न सर्वोऽतः प्रवाहाद्धि भिन्नो वेदाच्च भेदतः । 'यदा यस्ये' तिवचना 'न्नाहं वेदै' रितीरणात् ॥५॥ मार्गैकत्वेऽपि चेदन्त्यौ तनू भक्त्यागमौ मतौ । न तद् युक्तं सूत्रतो हि भिन्नोयुक्तया हि वैदिकः ॥६॥ जीवदेहकृतीनां च भिन्नत्वं नित्यता श्रुतेः । यथा तद्वत् पुष्टिमार्गे द्वयोरपि निषेधतः ॥७॥ प्रमाणभेदाद् भिन्नो हि पुष्टिमार्गो निरुपितः । सर्गभेदं प्रवक्ष्यामि स्वरुपाङ्गक्रियायुतम् ॥८॥ इच्छामात्रेण मनसा प्रवाहं

सृष्टवान् हरिः । वचसा वेदमार्गं हि पुष्टिं कायेन निश्चयः ॥९॥ मूलेच्छातः फलं लोके वेदोक्तं वैदिकेऽपि च । कायेन तु फलं पुष्टौ भिन्नेच्छातोऽपि नैकता ॥१०॥ 'तानहं द्विषतो' वाक्याद् भिन्ना जीवाः प्रवाहिणः । अत एवेतरौ भिन्नौ सान्तौ मोक्षप्रवेशतः ॥११॥ तस्माज् जीवाः पुष्टिमार्गे भिन्ना एव न संशयः । भगवद्रूपसेवार्थं तत्सृष्टिर्नान्यथा भवेत् ॥१२॥ स्वरूपेणावतारेण लिङ्गेन च गुणेन च। तारतम्यं न स्वरूपे देहे वा तत्क्रियासु वा ॥१३॥ तथापि यावता कार्यं तावत् तस्य करोति हि । ते हि द्विधा शुद्धमिश्रभेदान् मिश्रास्त्रिधा पुनः ॥१४॥ प्रवाहादिविभेदेन भगवत्कार्यसिद्धये । पुष्ट्या विमिश्राः सर्वज्ञाः प्रवाहेण क्रियारताः ॥१५॥ मर्यादया गुणज्ञास्ते शुद्धाः प्रेम्णातिदुर्लभाः । एवं सर्गस्तु तेषां हि फलं त्वत्र निरुप्यते ॥१६॥ भगवानेव हि फलं स यथाऽऽविर्भवेद् भुवि ।

गुणस्वरुपभेदेन तथा तेषां फलं भवेत् ॥१७॥ आसक्तौ भगवानेव शापं दापयति क्वचित् । अहङ्कारेऽथवा लोके तन्मार्गस्थापनाय हि ॥१८॥ न ते पाषण्डतां यान्ति न च रोगाद्युपद्रवाः । महानुभावाः प्रायेण शास्त्रं शुद्धत्वहेतवे ॥१९॥ भगवत्तारतम्येन तारतम्यं भजन्ति हि । लौकिकत्वं वैदिकत्वं कापट्यात् तेषु नान्यथा ॥२०॥ वैष्णवत्वं हि सहजं ततोन्यत्र विपर्ययः। सम्बन्धिनस्तु ये जीवाः प्रवाहस्थास्तथापरे ॥२१॥ चर्षणीशब्दवाच्यास्ते ते सर्वे सर्ववर्त्मसु । क्षणात् सर्वत्वमायान्ति रुचिस्तेषां न कुत्रचित् ॥२२॥ तेषां क्रियानुसारेण सर्वत्र सकलं फलम् । प्रवाहस्थान् प्रवक्ष्यामि स्वरूपाङ्गक्रियायुतान् ॥ २३ ॥ जीवास्ते ह्यासुराः सर्वे प्रवृत्तिं चे’ ति वर्णिताः। ते च द्विधा प्रकीर्त्यन्ते ह्यज्ञदुर्ज्ञ विभेदतः ॥२४॥ दुर्ज्ञास्ते भगवत्प्रोक्ता ह्यज्ञास्ताननु ये पुनः । प्रवाहेपि समागत्य पुष्टिस्थस्तैर्न

युज्यते ॥२५॥ सोपि तैस्तत्कुले जातः कर्मणा जायते यतः ॥२६॥

॥ इति श्रीमद्वल्लभाचार्यविरचितः पुष्टिप्रवाहमर्यादाभेदः सम्पूर्णः ॥४॥

## ॥ अथ सिद्धान्तरहस्यम् ॥

श्रावणस्यामले पक्षे एकादश्यां महानिशि । साक्षाद् भगवता प्रोक्तं तदक्षरश उच्यते ॥१॥ ब्रह्मसम्बन्धकरणात् सर्वेषां देहजीवयोः । सर्वदोषनिवृत्तिर्हि दोषा:पञ्चविधाः स्मृताः ॥२॥ सहजा देशकालोत्था लोकवेदनिरुपिताः । संयोगजाः स्पर्शजाश्च न मन्तव्याः कथञ्चन ॥३॥ अन्यथा सर्वदोषाणां न निवृत्तिः कथञ्चन । असमर्पितवस्तूनां तस्माद् वर्जनमाचरेत् ॥४॥ निवेदिभिः समर्प्यैव सर्वं कुर्यादितिस्थितिः । न मतं देवदेवस्य सामिभुक्तसमर्पणम् ॥५॥ तस्मादादौ सर्वकार्ये

सर्ववस्तुसमर्पणम् । दत्तापहारवचनं तथा च सकलं हरेः ॥६॥ 'न ग्राह्य' मितिवाक्यं हि भिन्नमार्गपरं मतम् ।सेवकानां यथा लोके व्यवहारः प्रसिध्यति ॥७॥ तथा कार्यं समर्प्यैव सर्वेषां ब्रह्मता ततः ।गङ्गात्वं सर्वदोषाणां गुणदोषादिवर्णना ॥८॥ गङ्गात्वेन निरुप्या स्यात् तद्वदत्रापि चैव हि ॥९॥

॥ इति श्रीमद्वल्लभाचार्यविरचितं सिद्धान्तरहस्यं सम्पूर्णम् ॥५॥

## ॥ अथ नवरत्नम् ॥

चिन्ता कापि न कार्या निवेदितात्मभिः कदापीति । भगवानपि पुष्टिस्थो न करिष्यति लौकिकीं च गतिम् ॥१॥ निवेदनं तु स्मर्तव्यं सर्वथा तादृशैर्जनैः । सर्वेश्वरश्च सर्वात्मा निजेच्छातः करिष्यति ॥२॥ सर्वेषां प्रभुसम्बन्धो न प्रत्येकमितिस्थितिः । अतोऽन्यविनियोगेऽपि चिन्ता का स्वस्य सोऽपि

चेत् ॥३॥ अज्ञानादथवा ज्ञानात् कृतमात्मनिवेदनम् । यैः कृष्णसात्कृतप्राणैस्तेषां का परिदेवना ॥४॥ तथा निवेदने चिन्ता त्याज्या श्रीपुरुषोत्तमे । विनियोगेपि सा त्याज्या समर्थो हि हरिः स्वतः ॥५॥ लोके स्वास्थ्यं तथा वेदे हरिस्तु न करिष्यति । पुष्टिमार्गस्थितो यस्मात् साक्षिणो भवताखिलाः ॥६॥ सेवाकृतिर्गुरोराज्ञा बाधनं वा हरीच्छया । अतः सेवापरं चित्तं विधाय स्थीयतां सुखम् ॥७॥ चित्तोद्वेगं विधायापि हरिर्यद्यत् करिष्यति । तथैव तस्य लीलेति मत्वा चिन्तां द्रुतं त्यजेत् ॥८॥ तस्मात् सर्वात्मना नित्यं श्रीकृष्णः शरणं मम ।वदद्भिरेवं सततं स्थेयमित्येव मे मतिः ॥९॥

॥ इति श्रीमद्वल्लभाचार्यविरचितं नवरत्नं सम्पूर्णम् ॥६॥

## ॥ अथान्तःकरणप्रबोधः ॥

अन्तःकरण मद्वाक्यं सावधानतया शृणु । कृष्णात् परं नास्ति दैवं वस्तुतो दोषवर्जितम् ॥१॥ चाण्डोली चेद् राजपत्नी जाता राज्ञा च मानिता । कदाचिदपमानेऽपि मूलतः का क्षतिर्भवेत् ॥२॥ समर्पणादहं पूर्वमुत्तमः किं सदा स्थितः । का ममाधमता भाव्या पश्चात्तापो यतो भवेत् ॥३॥ सत्यसङ्कल्पतो विष्णुर्नान्यथा तु करिष्यति । आज्ञैव कार्या सततं स्वामिद्रोहोन्यथा भवेत् ॥४॥ सेवकस्य तु धर्मोऽयं स्वामी स्वस्य करिष्यति । आज्ञा पूर्वं तु या जाता गङ्गासागरसङ्गमें ॥५॥ यापि पश्चान् मधुवने न कृतं तद् द्वयं मया । देहदेशपरित्यागस्तृतीयो लोकगोचरः ॥६॥ पश्चात्तापः कथं तत्र सेवकोऽहं न चान्यथा । लौकिकप्रभुवत् कृष्णो न द्रष्टव्यः कदाचन ॥७॥ सर्वं समर्पितं भक्तया कृतार्थोसि सुखी भव । प्रौढापि दुहिता यद्वत् स्नेहान्न प्रेष्यते वरे ॥८॥ तथा देहे न कर्तव्यं वरस्तुष्यति

नान्यथा । लोकवच्चेत् स्थितिर्मे स्यात् किं स्यादिति विचारय ॥९॥ अशक्ये हरिरेवास्ति मोहं मा गाः कथञ्चन । इति श्रीकृष्णदासस्य वल्लभस्य हितं वचः ॥१०॥ चित्तं प्रति यदाकर्ण्य भक्तो निश्चिन्ततां व्रजेत् ॥११॥

॥ इति श्रीमद्वल्लभाचार्यविरचितोन्तः करणप्रबोधः सम्पूर्णः ॥७॥

## ॥ अथ विवेकधैर्याश्रयनिरुपणम् ॥

विवेकधैर्य सततं रक्षणीये तथाश्रयः । विवेकस्तु हरिः सर्वं निजेच्छातः करिष्यति ॥१॥ प्रार्थिते वा ततः किं स्यात् स्वाम्यभिप्रायसंशयात् । सर्वत्र तस्य सर्वं हि सर्वसामर्थ्यमेव च ॥२॥ अभिमानश्च सन्त्याज्यः स्वाम्यधीनत्वभावनात् । विशेषतश्चेदाज्ञा स्यादन्तः करणगोचरः ॥३॥ तदा विशेषगत्यादि भाव्यं भिन्नं तु दैहिकात् । आपद्गत्यादिकार्येषु हठस्त्याज्यश्च सर्वथा ॥४॥ अनाग्रहश्च सर्वत्र धर्माधर्माग्रदर्शनम् ।

विवेकाऽयं समाख्यातो धैर्यं तु विनिरुप्यते ॥५॥ त्रिदुःखसहनं धैर्यमामृतेः
सर्वतः सदा । तक्रवद् देहवद् भाव्यं जडवद् गोपभार्यवत् ॥६॥ प्रतीकारो
यदृच्छातः सिद्धश्चेन्नाग्रही भवेत् । भार्यादीनां तथान्येषामसतश्चाक्रमं सहेत्
॥७॥ स्वयमिन्द्रियकार्याणि कायवाङ्मनसा त्यजेत् । अशूरेणापि कर्तव्यं
स्वस्यासामर्थ्यभावनात् ॥८॥ अशक्ये हरिरेवास्ति सर्वमाश्रयतो भवेत् ।
एतत् सहनमत्रोक्तमाश्रयोतो निरुप्यते ॥९॥ ऐहिके पारलोके च सर्वथा
शरणं हरिः । दुःखहानौ तथा पापे भये कामाद्यपूरणे ॥१०॥ भक्तद्रोहे
भक्त्यभावे भक्तैश्चातिक्रमे कृते । अशक्ये वा सुशक्ये वा सर्वथा शरणं
हरिः ॥११॥ अहङ्कारकृते चैव पोष्यपोषणरक्षणे । पोष्यातिक्रमणे चैव
तथान्तेवास्यतिक्रमे ॥१२॥ अलौकिकमनः सिद्धौ सर्वार्थे शरणं हरिः ।
एवं चित्ते सदा भाव्यं वाचा च परिकीर्तियेत् ॥१३॥ अन्यस्य भजनं तत्र

स्वतो गमनमेव च । प्रार्थना कार्यमात्रेऽपि ततोऽन्यत्र विवर्जयेत् ॥१४॥ अविश्वासो न कर्तव्यः सर्वथा बाधकस्तु सः । ब्रह्मास्त्रचातकौ भाव्यौ प्राप्तं सेवेत निर्ममः ॥१५॥ यथाकथञ्चित् कार्याणि कुर्यादुच्चावचान्यपि । किं वा प्रोक्तेन बहुना शरणं भावयेद्धरिम् ॥१६॥ एवमाश्रयणं प्रोक्तंसर्वेषां सर्वदा हितम् । कलौभक्त्यादिमार्गा हि दुःसाध्या इति म मतिः ॥१७॥

॥ इति श्रीमद्वल्लभाचायविरचितं विवेकाधैर्याश्रयरुपणं सम्पूर्णम् ॥८॥

## ॥ अथ श्रीकृष्णाश्रयः ॥

सर्वमार्गेषु नष्टेषु कलौ च खलधर्मिणि । पाषण्डप्रचुरे लोके कृष्ण एव गतिर्मम ॥१॥ म्लेच्छाक्रान्तेषु देशेषु पापैकनिलयेषु च । सत्पीडाव्यग्रलोकेषु कृष्ण एव गतिर्मम ॥२॥ गङ्गादितीर्थवर्येषु दुष्टैरेवावृतेष्विह । तिरोहिताधिदैवेषु कृष्ण एव गतिर्मम ॥३॥

अहङ्कारविमूढेषु सत्सु पापानुवर्तिषु । लाभपूजार्थयत्नेषु कृष्ण एव गतिर्मम ॥४॥ अपरिज्ञाननष्टेषु मन्त्रेष्ववृतयोगिषु । तिरोहितार्थदेवेषु कृष्ण एव गतिर्मम ॥५॥ नानावादविनष्टेषु सर्वकर्मव्रतादिषु । पाषण्डैकप्रयत्नेषु कृष्ण एव गतिर्मम ॥६॥ अजामिलादिदोषाणां नाशकोऽनुभवे स्थितः । ज्ञापिताखिलमाहात्म्यः कृष्ण एव गतिर्मम ॥७॥ प्राकृताः सकला देवा गणितानन्दकं बृहत् । पूर्णानन्दो हरिस्तस्मात् कृष्ण एव गतिर्मम ॥८॥ विवेकधैर्यभक्त्यादिरहितस्य विशेषतः । पापासक्तस्य दीनस्य कृष्ण एव गतिर्मम ॥९॥ सर्वसामर्थ्यसहितः सर्वत्रैवाखिलार्थकृत् ।शरणस्थसमुद्धारं कृष्णं विज्ञापयाम्यहम् ॥१०॥ कृष्णाश्रयमिदं स्तोत्रं यः पठेत् कृष्णसन्निधौ। तस्याश्रयो भवेत् कृष्ण इति श्रीवल्लभोऽब्रवीत् ॥११॥

॥ इति श्रीमद्वल्लभाचार्यविरचितः श्रीकृष्णाश्रयः सम्पूर्णः ॥९॥

## ॥ अथ चतुःश्लोकी ॥

सर्वदा सर्वभावेन भजनीयो व्रजाधिपः । स्वस्यायमेव धर्मो हि नान्यः क्वापि कदाचन ॥१॥ एवं सदा स्म कर्तव्यं स्वयमेव करिष्यति । प्रभुः सर्वसमर्थो हि ततो निश्चिन्ततां व्रजेत् ॥२॥यदि श्रीगोकुलाधीशो धृतः सर्वात्मना हृदि । ततः किमपरं ब्रूहि लौकिकैर्वैदिकैरपि ॥३॥ अतः सर्वात्मना शश्वद् गोकुलेश्वरपादयोः । स्मरणं भजनं चापि न त्याज्यमिति मे मतिः ॥४॥

॥ इति श्रीमद्वल्लभाचार्यविरचिता चतुःश्लोकी सम्पूर्णा ॥१०॥

## ॥ अथ भक्तिवर्धिनी ॥

यथा भक्तिः प्रवृद्धा स्यात् तथोपायो निरुप्यते । बीजभावे दृढे तु स्यात् त्यागाच्छ्रवणकीर्तनात् ॥१॥ बीजदार्ढ्यप्रकारस्तु गृहे स्थित्वा स्वधर्मतः ।

अव्यावृत्तो भजेत् कृष्णं पूजया श्रवणादिभिः ॥२॥व्यावृत्तोपि हरौ चित्तं
श्रवणादौ यतेत् सदा । ततः प्रेम तथासक्तिर्व्यसनं च यदा भवेत् ॥३॥
बीजं तदुच्यते शास्त्रे दृढं यन्नापि नश्यति ।स्नेहाद्रागविनाशः स्यादासक्त्या
स्याद् गृहारुचिः ॥४॥ गृहस्थानां बाधकत्वमनात्मत्वं च भासते । यदा स्याद्
व्यसनं कृष्णे कृतार्थः स्यात् तदैव हि ॥५॥ तादृशस्यापि सततं गृहस्थानं
विनाशकम् । त्यागं कृत्वा येतद् यस्तु तदर्थार्थैकमानसः ॥६॥ लभते सुदृढां भक्तिं
सर्वतोऽप्यधिकां पराम् । त्यागे बाधकभूयस्त्वं दुःसंर्गात् तथाऽन्नतः ॥७॥ अतः
स्थेयं हरिस्थाने तदीयैः सह तत्परैः । अदूरे विप्रकर्षे वा यथा चित्तं न दुष्यति ॥८॥
सेवायां वा कथायां वा यस्यासक्तिर्दृढा भवेत् । यावज्जीवं तस्य नाशो न क्वापीति
मतिर्मम ॥९॥ बाधसम्भावनायां तु नैकान्ते वास इष्यते । हरिस्तु सर्वतो रक्षां
करिष्यति न संशयः ॥१०॥ इत्येवं भगवच्छास्त्रं गूढतत्वं निरुपितम् । य एतत्

समधीयीत तस्यापि स्याद् दृढ रतिः ॥११॥

॥ इति श्रीमद्वल्लभाचार्यविरचिता भक्तिवर्धिनी सम्पूर्णा ॥११॥

## ॥ अथ जलभेदः ॥

नमस्कृत्य हरि वक्ष्ये वक्ष्ये तद्गुणानां विभेदकान् । भावान् विंशतिधा भिन्नान् सर्वसन्देहवारकान् ॥१॥ गुणभेदास्तु तावन्तो यावन्तो हि जले मताः । गायकाः कूमसङ्काशा गन्धर्वा इति विश्रुताः ॥२॥ कूपभेदास्तु यावन्तस्तावन्तस्तेपि सम्मताः । कुल्याः पौराणिकाः प्रोक्ताः पारम्पर्ययुता भुवि ॥३॥ क्षेत्रप्रविष्टास्ते चापि संसारोत्पत्तिहेतवः । वेश्यादिसहिता मत्ता गायका गर्तसंज्ञिताः ॥४॥ जलार्थमेव गर्तास्तु नीचा गानोपजीविनः । ह्रदास्तु पण्डिताः प्रोक्ता भगवच्छास्त्रतत्पराः ॥५॥ सन्देहवारकास्तत्र सूदा गम्भीरमानसाः । सरः कमलसम्पूर्णाः प्रेमयुक्तास्तथा बुधाः ॥६॥

अल्पश्रुताः प्रेमयुक्ताः वेशन्ताः परिकीर्तिताः । कर्मशुद्धाः पल्वलानि तथाल्पश्रुतिभक्तयः ॥७॥ योगध्यानादिसंयुक्ता गुणा वर्ष्याः प्रकीर्तिताः । तपोज्ञानादिभावेन स्वेदजास्तु प्रकीर्तिताः ॥८॥ अलौकिकेन ज्ञानेन ये तु प्रोक्ता हरेर्गुणाः । कादाचित्काः शब्दगम्याः पतच्छब्दाः प्रकीर्तिताः ॥९॥ देवाद्युपासनोद्भूताः पृष्वा भूमेरिवोद्गताः । साधनादिप्रकारेण नवधा भक्तिमार्गतः ॥१०॥ प्रेमपूर्त्या स्फूरद्धर्माः स्यन्दमानाः प्रकीर्तिताः । यादृशास्तादृशाः प्रोक्ता वृद्धिक्षयविवर्जिताः ॥११॥ स्थावरास्ते समाख्याता मर्यादैकप्रतिष्ठिताः । अनेकजन्मसंसिद्धा जन्मप्रभृति सर्वदा ॥१२॥ सङ्गादिगुणदोषाभ्यां वृद्धिक्षययुता भुवि । निरन्तरोद्गमयुता नद्यस्ते परिकीर्तिताः ॥१३॥ एतादृशाः स्वतन्त्राश्चेत् सिन्धवः परिकीर्तिताः । पूर्णा भगवदीया ये शेषव्यासाग्निमारुताः ॥१४॥ जडनारदमैत्राद्यास्ते

समुद्राः प्रकीर्तिताः । लोकवेदगुणैर्मिश्रभावेनैके हरेर्गुणान् ॥१५॥ वर्णयन्ति समुद्रास्ते क्षाराद्याः षट् प्रकीर्तिताः । गुणातीततया शुद्धान् सच्चिदानन्दरुपिणः ॥१६॥ सर्वानेव गुणान् विष्णोर्वर्णयन्ति विचक्षणाः। तेमृतोदाः समाख्यातास्तद्वाक्पानं सुदुर्लभम् ॥१७॥ तादृशानां क्वचिद् वाक्यं दूतानामिव वर्णितम् । अजामिलाकर्णनवद् बिन्दुपानं प्रकीर्तितम् ॥१८॥ रागाज्ञानादिभावानां सर्वथा नाशनं यदा । तदा लेहनमित्युक्तं स्वानन्दोद्गमकारणम् ॥१९॥ उद्धृतोदकवत् सर्वे पतितोदकवत् तथा । उक्तातिरिक्तवाक्यानि फलं चापि तथा ततः ॥२०॥ इति जीवेन्द्रियगता नानाभावं गता भुवि । रुपतः फलतश्चैव गुणा विष्णोर्निरुपिताः ॥२१॥

॥ इति श्रीमद्वल्लभाचार्यविरचितो जलभेदः सम्पूर्णः ॥१२॥

## ॥ अथ पञ्चपद्यानि ॥

श्रीकृष्णरसविक्षिप्तसमानसारतिवर्जिताः। अनिर्वृता लोकवेदे ते मुख्याः श्रवणोत्सुकाः ॥१॥ निःसन्दिग्धं कृष्णतत्त्वं सर्वभावेन ये विदुः । तेत्वावेशात् तु विकला निरोधाद् वा न चान्यथा ॥२॥ विक्लिन्नमनसो ये तु भगवत्स्मृतिविह्वलाः । अथैकनिष्ठास्ते चापि मध्यमाः श्रवणोत्सुकाः ॥३॥ पूर्णभावेन पूर्णार्थाः कदाचिन्न तु सर्वदा । अन्यासक्तास्तु ये केचिदधमाः परिकीर्तिताः ॥४॥ अनन्यमनसो मर्त्या उत्तमाः श्रवणादिषु देशकालद्रव्यकर्तृमन्त्रकर्मप्रकारतः ॥५॥

॥ इति श्रीमद्वल्लभाचार्यविरचतानि पञ्चपद्यानि सम्पूर्णानि ॥१३॥

## ॥अथ सन्न्यासनिर्णयः॥

पश्चात्तापनिवृत्त्यर्थं परित्यागो विचार्यते । स मार्गद्वितये प्रोक्तो भक्तौ ज्ञाने

विशेषतः ॥१॥ कर्ममार्गे न कर्तव्यः सुतरां कलिकालतः । अत आदौ भक्तिमार्गे कर्तव्यत्वाद विचारणा ॥२॥ श्रवणादिप्रवृत्त्यर्थं कर्तव्यश्चेत् स नेष्यते । सहायसङ्गसाध्यत्वात् साधनानां च रक्षणात् ॥३॥ अभिमानान्नियोगाच्च तद्धर्मैश्च विरोधतः । गृहादेर्बाधकत्वेन साधनार्थं तथायदि ॥४॥ अग्रेऽपि तादृशैरेव सङ्गो भवति नान्यथा । स्वयं च विषयाक्रान्तः पाषण्डी स्यात् तु कालतः ॥५॥ विषयाक्रान्तदेहानां नावेशः सर्वदा हरेः । अतोऽत्र साधने भक्तौ नैव त्यागः सुखावहः ॥६॥ विरहानुभवार्थं तु परित्यागः प्रशस्यते । स्वीयबन्धनिवृत्त्यर्थं वेशः सोऽत्र न चान्यथा ॥७॥ कौण्डिन्यो गोपिकाः प्रोक्ताः गुरवः साधनं च तत् । भावो भावनया सिद्धः साधनं नान्यदिष्यते ॥८॥ विकलत्वं तथास्वास्थ्यं प्रकृतिः प्राकृतं न हि । ज्ञानं गुणाश्च तस्यैवं वर्तमानस्य बाधकाः ॥९॥ सत्यलोके स्थितिर्ज्ञानात् सन्नयासेन

विशेषितात् । भावना साधनं यत्र फलं चापि तथा भवेत् ॥१०॥ तादृशाः सत्यलोकादौ तिष्ठन्त्येव न संशयः । बहिश्चेत् प्रकटः स्वात्मा वह्निवत् प्रविशेद् यदि ॥११॥ तदैव सकलो बन्धो नाशमेति न चान्यथा । गुणास्तु सङ्गराहित्याज् जीवनार्थं भवन्ति हि ॥१२॥ भगवान् फलरुपवान्नात्र बाधक इष्यते । स्वास्थ्यवाक्यं न कर्तव्यं दयालुर्न विरुध्यते ॥१३॥ दुर्लभोऽयं परित्यागः प्रेम्णा सिध्यति नान्यथा । ज्ञानमार्गे तु सन्न्यासो द्विविधोऽपि विचारितः ॥१४॥ ज्ञानार्थमुत्तराऽगं च सिद्धिर्जन्मशतैः परम् । ज्ञानं च साधनापेक्षं यज्ञादिश्रवणान् मतम् ॥१५॥ अतः कलौ स सन्न्यासः पश्चात्तापाय नान्यथा । पाषण्डित्वं भवेच्चापि तस्माज् ज्ञाने न सन्न्यसेत् ॥१६॥ सुतरां कलिदोषाणां प्रबलत्वादितिस्थिति : । भक्तिमार्गेऽपि चेद् दोषस्तदा किं कार्यमुच्यते ॥१७॥ अत्रारम्भे न नाशः स्याद् दृष्टान्तस्याप्यभावतः । स्वास्थ्यहेतोः परित्यागाद् बाधः

केनास्य सम्भवेत् ॥१८॥ हरिरत्र न शक्नोति कर्तुं बाधां कुतोऽपरे । अन्यथा मातरो बालान् स्तन्यैः पुपुषुः क्वचित् ॥१९॥ ज्ञानिनामपि वाक्येन न भक्तं मोहयिष्यति। आत्मप्रदः प्रियश्चापि किमर्थं मोहयिष्यति ॥२०॥ तस्मादुक्तप्रकारेण परित्यागो विधीयताम् । अन्यथा भ्रश्यते स्वार्थादिति मे निश्चिता मतिः ॥२१॥ इति कृष्णप्रसादेन वल्लभेन विनिश्चितम् । सन्न्यासवरणं भक्तावन्यथा पतितो भवेत् ॥२२॥

॥ इति श्रीमद्वल्लभाचार्यविरचितः सन्न्यासनिर्णयः सम्पूर्णः ॥१४॥

## ॥ अथ निरोधलक्षणम् ॥

यच्च दुःखं यशोदाया नन्दादीनां च गोकुले । गोपिकानां तु यद् दुःखं तद्दुःखं स्यान् मम क्वचित् ॥१॥ गोकुले गोपिकानां तु सर्वेषां व्रजवासिनाम् । यत् सुखं समभूत तन्मे भगवान् किं विद्यास्यति ॥२॥ उद्धवागमने जात उत्सवः

सुमहान् यथा । वृन्दावने गोकुले वा तथा मे मनसि क्वचित् ॥३॥ महतां कृपया यावद् भगवान दययिष्यति । तावदानन्दसन्दोहः कीर्त्यमानः सुखाय हि ॥४॥ महतां कृपया यद्वत् कीर्तनं सुखदं सदा । न तथा लौकिकानां तु स्निग्धभोजनरुक्षवत् ॥५॥ गुणगाने सुखावाप्तिर्गोविन्दस्य प्रजायते । यथा तथा शुकादीनां नैवात्मनि कुतोन्यतः ॥६॥ क्लिश्यमानाज् जनान् दृष्टवा कृपायुक्तो यदा भवेत् । तदा सर्वं सदानन्दं हृदिस्थं निर्गतं बहिः ॥७॥ सर्वानन्दमयस्यापि कृपानन्दः सुदुर्लभः । हृद्गतः स्वगुणाज् श्रुत्वा पूर्णः प्लावयते जनान् ॥८॥ तस्मात् सर्वं परित्यज्य निरुद्धैः सर्वदा गुणाः । सदानन्दपरैर्गेयाः सच्चिदानन्दता ततः ॥९॥ अहं निरुद्धो रोधेन निरोधपदवीं गतः । निरुद्धानां तु रोधाय निरोधं वर्णयामि ते ॥१०॥ हरिणा ये विनिर्मुक्तास्ते मग्ना भवसागरे । ये निरुद्धास्त एवात्र

मोदमायान्त्यहर्निशम् ॥११॥ संसारावेशदुष्टानामिन्द्रियाणां हिताय वै । कृष्णस्य सर्ववस्तूनि भूम्न ईशस्य योजयेत् ॥१२॥ गुणेष्वाविष्टचित्तानां सर्वदा मुखवैरिणः । संसारविरहक्लेशौ न स्यातां हरिवत् सुखम् ॥१३॥ तदा भवेद् दयालुत्वमन्यथा क्रूरता मता । बाधशङ्कापि नास्त्यत्र तद्ध्यासोऽपि सिध्यति ॥१४॥ भगवद्धर्मसामर्थ्याद् विरागो विषये स्थिरः । गुणैर् हरिः सुखस्पर्शान्न दुःखं भाति कर्हिचित् ॥१५॥ एवं ज्ञात्वा ज्ञानमार्गादुत्कर्षो गुणवर्णने । अमत्सरैरलुब्धैश्च वर्णनीयाः सदा गुणाः ॥१६॥ हरिमूर्तिः सदा ध्येया सङ्कल्पादपि तत्र हि । दर्शनं स्पर्शनं स्पष्टं तथा कृतिगति सदा ॥१७॥ श्रवणं कीर्तनं स्पष्टं पुत्रे कृष्णप्रिये रतिः । पायोर्मलांशत्यागेन शेषभागं तनौ नयेत् ॥१८॥ यस्य सा भगवत्कार्यं यदा स्पष्टं न दृश्यते ।तदा विनिग्रहस्तस्य कर्तव्य इति निश्चयः ॥१९॥ नातः परतरो मन्त्रो नातः

परतरः स्तवः । नातः परतरा विद्या तीर्थं नातः परात् परम् ॥२०॥

॥ इति श्रीमद्वल्लभाचार्यविरचितं निरोधलक्षणं सम्पूर्णम् ॥१५॥

## ॥ अथ सेवाफलम् ॥

यादृशी सेवना प्रोक्ता तत्सिद्धौ फलमुच्यते । अलौकिकस्यदाने हि चाद्यः सिध्येन् मनोरथः ॥१॥ फलं वा ह्यधिकारो वा न कालोऽत्र नियामकः । उद्वेगः प्रतिबन्धो वा भोगो वा स्यात् तु बाधकम् ॥२॥ अकर्तव्यं भगवतः सर्वथा चेद् गतिर्न हि । यथा वा तत्त्वनिर्धारो विवेकः साधनं मतम् ॥३॥ बाधकानां परित्यागो भोगोऽप्येकं तथापरम् । निष्प्रत्यूहं महान् भोगः प्रथमे विशते सदा ॥४॥ सविघ्नोऽल्पो धातकः स्याद् बलादेतौ सदा मतौ । द्वितीये सर्वथा चिन्ता त्याज्या संसारनिश्चयात् ॥५॥ नन्वाद्ये दातृता नास्ति तृतीये बाधकं गृहम् अवश्येयं सदा भाव्या सर्वमन्यन् मनोभ्रमः ॥६॥

तदीयैरपि तत् कार्यं पुष्टौ नैव विलम्बयेत् । गुणक्षोभेऽपि द्रष्टव्यमेतदेवेति स वै भ्रमः ॥७॥ कुसृष्टिरत्र वा काचिदुत्पद्येत स वह भ्रमः ॥८॥

॥ इति श्रीमद्वल्लभाचार्यविरचितं सेवाफलं सम्पूर्णम् ॥१६॥

## ॥ अथ मधुराष्टकम् ॥

अधरं मधुरं वदनं मधुरं नयंन मधुरं हसितं मधुरम् । हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥१॥ वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम्। चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥२॥ वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ । नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ॥३॥ गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् । रुपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ॥४॥ करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम् । वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥५॥ गुंजा मधुरा

माला मधुरा यमुना मधुरा वीची मधुरा । सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ॥६॥ गोपी मधूरा लीला मधुरा युक्तं मधुरं भुक्तं मधुरम् । इष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥७॥ गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा । दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥८॥

॥हरिः ओम भुभर्व स्वः ॥

हरिःओम तत्सवितुर भर्गोदेवस्य धिमहि । धियो यो नः प्रचोदयात् ॥

## ॥ श्रीमद् गायत्री भाष्यम् ॥

अस्य अयम् अर्थः यद्यपि प्रणवः व्याहृतयः च तथा भवन्ति तथापि तेषाम् अर्थः स्पष्टः न इति गायत्री अर्थः निरुप्यते । गायत्री अन्तर्गत 'तत्' शब्द व्याख्यान रुपस्य "सत्यम् परम् "इति कालत्रय अबाधितं सर्व लोक प्रसिद्धं सत्यं, परं श्रेष्ठं पुरुषोत्तम रुपं सर्व वेद प्रसिद्धम् इति । सवितुः

इति उक्तं प्रसवितुः इति । गायत्री हि वेदमाता वेद त्रय अर्थ प्रतिपादिका भवति । तेन निर्विध्न वाक् प्रसव अर्थम् गायत्र्या भवगद् उपस्थानं कुर्वाणा गायत्री अर्थम् आहुः तेन गायत्र्यां जगत् प्रसवत्वेन सर्व कर्तृत्वं, यथा कामधेनोः कल्पवृक्षात् चिन्तामणेः मन्त्र आदेः च जायमानाः पदार्थां दृश्यन्ते न हि ते विकृता भवन्ति । चतुर्विध पुरुषार्थ सिद्ध अर्थं जगत् जननं इति अर्थः । सर्व जीवानां सर्व पुरुषार्थं सिद्धि अर्थं जगत् इति उक्तं भवति । गायत्री अर्थे हि प्रसव मात्रं उक्तं न स्थिति प्रलयौ । वरेण्य भर्गस् शब्दाभ्यां च पश्चात् सूचितौ वरेण्यं इति भक्ति बीजं 'यम् एव एषः वृणुते तेन लभ्य' इति श्रुतेः एतेन परस्पर वरणम् उक्तं। वरणत्व उक्तया यथा कन्या स्व अभिमतम् एव,स्व पतित्वेन वृणुते वरः तादृशीम् एव कन्यां स्व स्त्रीत्वेन तथा च भगवान् स्व

दासत्वेन आत्मीयत्वेन अंगीकरोति इति उच्यते, तथा च यथा तद् अनन्तरं न अन्यत्र विनियोगः, तस्याः तथा एव एतस्य अपि इति ज्ञापितं भवति, पूर्वं केन अपि ज्ञातुम् अशक्यं इति अर्थः । वरणीयं सुन्दरम् इति स्वतः दोष अभाव उक्तः । भजनीय गुणान् वदन् सेवक उद्धारम् आह । भर्गः इति संसार निवृत्तिः । भर्जयति अखिलाम् अविद्याम् इति । भर्गस् शब्दः सकारान्तः व्याख्यातः स्वरूप स्फूर्त्या एव सर्वेषां सर्व अविद्या नाशकं, प्रमेयबलम् एतत्, देवत्वेन सर्वज्ञत्वम् अतः एव देवस्य । "धीमहि इति समस्तानां तद् ध्यानं सर्वथा हितम् " इति, धीमहि इति ध्यायेम प्रीतिं वा कुर्म इति अर्थः । धियो यो नः प्रचोदयात् इति, धियः बुद्धीः प्रचोदयात् इति तेन सर्व प्रेरकत्वम् आयाति, प्रकृष्टत्वेन मूल पुरुषोत्तम स्वरुप पर्यन्तम् चोदयात् इति प्रेरयति फल सम्बन्धं करोति

इति अर्थः । गायत्री बीजं, वेदो वृक्षः, श्री भागवतं फलम् इति, फल सम्बन्धेन श्री भागवत प्रतिपाद्यं ''वेद्यं वास्तवम् अत्र वस्तु'' इति वास्तव वस्तुषु ''पिबत भागवतम् रसम् आलयं'' इति रसम् आलयं, आङ्ग इषद्, अर्थे, लयः मोक्षः यद् रसअग्रे सः अपीषद् अति तुच्छ इति अर्थः, मोक्ष अधिक रसः तु ब्रह्मानन्दात् समुद्धत्य भजन आनंद योजने'' स रसः तु रस समूहो रास इति 'रास लीला एक तात्पर्यम् ' इति अर्थः , अतः एव रास एव सर्व इन्द्रिय आस्वाद्य साक्षात् स्वरुप सम्बंधः मनोरथअन्त रुपः, ''यतो वाचो निर्वतन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतः च न '' इति श्रुति प्रतिपाद्यः 'रसः वै सः' रस हि एव अयं लब्ध्वा आनन्दी भवति इति श्रुतेः ।। ननु प्रचोदयात् इति गायत्री चतुर्थ पादस्य

संन्यास आश्रम पर्यन्तं प्रेरकत्वम् आयाति कथं रासलीला एक तात्पर्यम् इति चेत् तत्र आह, भक्तिमार्गीय संन्यासः तु साक्षात् पुष्टि पुष्टि श्रुति रुपाणां रास मंडल मंडनानां, स्वयं एव उक्तं 'सन्त्यज्य सर्व विषयान् तव पादमूलं प्राप्ता' इत्यादि, चतुर्थ अध्याये ताः प्रति च भगवता उक्तं ''एवं मद् अर्थे उज्झित लोक वेद स्वानाम्'' इति तस्य स्व आत्मत्वेन परम काष्ठा आपन्न स्नेह आस्पद प्रभोः एव स्फूर्त्या इति''तत् त्वम् असि' इति महा वाक्यअर्थस्य तन्मनस्काः तद् आलापाः तद् विचेष्टाः तद् आत्मिकाः तद् गुणान् एव गायन्त्यः न आत्मआगाराणि सस्मरुः इति सिद्धिः । 'ननु तद् यो अहं सो असौ यो असौ सो अहं इति ऐतरेयके तैत्तिरीयके च अहं अस्मि ब्रह्म अहं अस्मि इति पठ्यते, अत्र मध्यस्थं ब्रह्म पदं उभयत्र सम्बध्यते, तेन आवृत्या व्यतिहारः अतः

ब्रह्म अभेद सिध्यति तथा लीला मध्यपाति भक्तानाम् अपि 'कृष्ण: अहं, अहं कृष्ण:' इति भाव उल्लेख: च श्रूयते, अत: तद् अभेद् ज्ञानं भक्ति फलम् इति प्रफुल्लमानं प्रतिवादिनं तत् स्वरुपं बोधयति, रसात्मकत्वात् भक्ते: संयोग-विप्रयोग-आत्कत्वाद् द्वितीय भाव उद्रेके यथा इतरे अश्रु प्रलापादय: व्यभिचारिभावा: तथा अति विगाढ भावेन तद् अभेद स्फूर्ति: अपि एक:, स न तु सार्वदिक: तद् आत्मानं तत्वेन विशिंषन्ति तं च स्व आत्मत्वेन, स: अत्र व्यतिहार पदार्थ इति अर्थ: । अपरं च, उद्देश्य विधेयभाव स्फूर्त्या न हि अद्वैत ज्ञानं अस्ति किन्तु भावना मात्रं, भक्तानां तु विरहभावे तद् आत्मकत्वं एव अखंडं स्फुरति येन लीला: स्वत: कुर्वन्ति एतद यथा तथा श्रीमद् भागवत दशम स्कन्ध विवृतौ

प्रपंचितम् अस्माभिः एवं सति मुख्यं यद् अद्वैत ज्ञानं तद् भक्ति भाव एक देश व्यभिचारि भावेषु एकतर इति सर्षप स्वर्ण–अचलयोः इव ज्ञानभक्तयोः तारतम्यं कथं वर्णनीयं इति भावः । भक्तिमार्गीय संन्यासे चतुर्थ पाद गायत्री अर्थः तु ''यो अहं सो असौ यो असौ सो अहं इति'', ''यः पुरुषोत्तमः अहं भक्तः''। फल प्रकरण प्रथमं अध्याये 'बाहु प्रसार' इति भिन्न संयोग उक्तिः द्वितीय अध्याये''अन्तर्हिते भगवति''इति आदिना विप्रयोगे असौ उभयत्र , एक आत्मकः भवति इति । द्वितीये 'सो असौ',तृतीय अध्याये अपि एक आत्मनोः एव द्विवचन उभय भाव आत्मकस्फूर्तिः 'यो असौ' उभय भाव आत्मकः चतुर्थ अध्याये 'तासाम् आविर्भूत' इत्यादिना उक्तः 'सः अहम्' इति 'सः' पुरुषोत्तमः 'अहं' भक्तः भिन्नः अस्मि, तत् पंचम अध्याये संयोगरसे

परमकाष्ठा आपन्न अनिर्वचनीय रससमूह रास रसअब्धि कल्लोल सर्व इन्द्रिय आस्वाद्य रस अनुभवं करोति । वेदोक्त महावाक्यात् ''तत् त्वम् असि' ' अहम् अस्मि' 'ब्रह्म अहम् अस्मि' इत्यादि विप्रयोग भाव आत्मक रस आनंदो भवति संयोगरसे 'कृष्ण तव अस्मि' इति, 'अभयं सर्व भूतेभ्यो ददामि एतद् व्रतम् मम' इति माम् एकम् एव शरणं आत्मानं सर्व देहिनां । याहि सर्वात्म भावेन यास्यसे हि अकुतः 'भयम्' इत्यादि इति दिक् अतः एव श्रुतिः 'आत्मानं द्वेधा पातयत पतिः च पत्नी च अभवताम्' इति, व्यास सूत्रे 'लोकवत् तु लीला कैवल्यम्' इति आदि । सर्व अज्ञात स्वरुपम् हि, ब्रह्म पूर्वं रिंसया । ततो अखिल जगद् रुपं भूत्वा तत्रा अति दुस्तराः ॥१॥ भक्ताः सर्वम् परित्यज्य प्रभु प्राप्त्यै यथा रहः । साक्षात् स्वरूप दानेन परा लीलेयमित्यपि ॥२॥ लीला सम्बन्धिनः तत्र सर्वम् भगवद् आत्मकम् ।

प्रवर्तकत्वतो वेणु नादो वेद आत्मको अत्र हि ॥३॥ यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनंद ब्रह्मणो विद्वान न बिभेति कुतश्चन इति दिक् ॥४॥

॥ इति श्रीमद् वल्लभाचार्य विरचितं गायत्री भाष्यम् सम्पूर्णम् ॥

## श्रीमद्ब्रह्मसूत्राणुभाष्यम्

साङ्गोऽध्येयस्तथा ज्ञेयो वेदः शब्दाश्च बोधकाः । निसंदिग्धं तदर्थाश्च लोकवद्व्याकृतेः स्फुटाः ॥१॥ अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते । तपसा वेदयुक्त्या तु प्रसादात्परमात्मनः ॥२॥ संदेहवारकं शास्त्रं बुद्धिदोषात्तदुद्भवः ।विरुद्धशास्त्रसम्भेदादङ्गैश्चाशक्यनिश्चयः ॥३॥ तस्मात्सूत्रानुसारेण कर्तव्यः सर्वनिर्णयः । अन्यथा भ्रश्यते स्वार्थान्मध्यमश्च तथादिमः ॥४॥ असंदिग्धेऽपि वेदार्थे स्थूणाखनननवन्मतः । मीमांसानिर्णयः प्राज्ञे दुर्बुद्धेस्तु ततो द्वयमिति ॥५॥

संदेहवारकं शास्त्रं वेदप्रामाण्यवादिनाम् । क्रियाशक्तिज्ञानशक्ती संदिह्योते परस्थिते ॥६॥ उत्पत्तिस्थितिनाशानां जगतः कर्तृत्वै बृहत् । वेदेन बोधितं तद्धि नान्यथा भवितुं क्षमम् ॥७॥ नहि श्रुतिविरोधोऽस्ति कल्पोऽपि न विरुध्यते । सर्वभावसमर्थत्वादचिन्त्यैश्वर्यवद् बृहत् ॥८॥ साधनं च फलं चैव सर्वस्याह श्रुतिः स्फुटम् । न प्रवर्तयितुं शक्ता तथा चेन्नरको न हि ॥९॥ प्रवर्तकस्तु सर्वत्र सर्वात्मा हरिरेव हि । यज्ञ एव हि पूर्वत्र बोध्यते स्वर्गसिद्धये ॥१०॥ सिद्ध एव हि सर्वत्र वेदार्थो वेदवादिनाम् । मन्त्राणां कर्मणां चैव दर्शनश्रवणाच्छ्रुतौ ॥११॥ कृतिश्च सिद्धतुल्यत्वं वेदः स्वार्थे च संमतः । एकस्यैव ममांशस्य जीवस्यैव महामते ॥१२॥ बन्धोऽस्याविद्ययानादिर्विद्यया च तथेतरः । ज्ञापनार्थं प्रमाणानि संनिकर्षादिमार्गतः ॥१३॥ सर्वथाऽविषयेऽवाच्ये व्यवहार्ये कुतः प्रमा ।

एवं विचारचातुर्यवद्भिः सद्भिर्व्रजाधिपे ॥१४॥ आनन्दमयतानन्दसंदोहायावधार्यते । पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः ॥१५॥ अमृतं क्षेममभयं त्रिमूर्ध्नोऽद्यायि मूर्द्धसु । संदेहवारकं शास्त्रं पदशक्त्या तु निर्णयः ॥१६॥ जीवादुत्कर्षशब्देन द्वयोर्वाक्येऽपि न क्षतिः । बाधकानां बलिष्ठत्वात्साधकानामभावतः ॥१७॥ आधारधर्मा बाध्येरन्निति पादोऽभिधीयते । यस्मिन्नित्यादिवाक्ये च वाक्यार्थः सर्वबाधितः ॥१८॥ अर्थात्प्रकरणाल्लिङ्गादिति पूर्वं विचार्यते । ऋषीणां पूर्वचरितस्मरणं स्मृतिरुच्यते ॥१९॥ कठवल्लीविचारेण निश्चिता ह्यधिकारिणः । वाक्यान्तरं च तत्रत्यं चिन्त्यते प्रलयावधि ॥२०॥ ब्रह्मधर्माश्च ये केचित्सिद्धा युक्त्यापि साधिताः ॥ निर्णायकास्ततोऽप्यन्ये चत्वारोऽत्र निरुपिताः ॥२१॥ संदिग्धानां पदार्थानां पौर्वापर्येण निर्णयः । न तु

संदिग्धवाक्येन सर्वव्याकुलतोचिता ॥२२॥ जीवप्रकरणं ह्येतन्मुक्त्युपायोऽस्य रुप्यते । योग्यं शरीरमारुह्य गच्छेदिति हरेः पदम् ॥२३॥ अनेकरुढिशब्दानां वाच्यं ब्रह्मैव नापरम् । शाक्तास्तांश्चेत् ब्रूयुस्ते सन्मार्गद्बहिष्कृताः ॥२४॥ भ्रान्तिमूलतया सर्वं समयानामयुक्तितः । न तद्विरोधाद्वचनं वैदिकं शङ्क्यतां व्रजेत् ॥२५॥ वेदोक्तादणुमात्रेऽपि विपरीतं तु यद्भवेत् । तादृशं वा स्वतंत्रं चेदुभयं मूलतो मृषा ॥२६॥ अनित्ये जननं नित्ये परिच्छिन्ने समागमः । नित्यापरिच्छिन्नतनौ प्राकट्यं चेति सा त्रिधा॥२७॥ व्यापकत्वश्रुतिस्तस्य भगवत्त्वेन युज्यते । आनन्दांशाभिव्यक्तौ तु तत्र ब्रह्माण्डकोटयः ॥२८॥ प्रतीयेरन्परिच्छेदो व्यापकत्वं च तस्य तत् । विस्फुलिङ्गा इवाग्नेर्हि जडजीवा विनिर्गता॥२९॥ सर्वतः पाणिपादान्तात्सर्वतोऽक्षिशिरोमुखात् ।

निरिन्द्रयात्स्वरुपेण ताद्दशादिति निश्चयः ॥३०॥ सदंशेन जडाः पूर्वं चिदंशेनेतरे अपि । अन्यधर्म तिरोभावात् मूलेच्छातोः स्वतन्त्रिणः ॥३१॥ सर्वोपनिषदां सिद्धो ह्यविरोधे समन्वयः । कथं बोधकता तासां सा तृतीये विचार्यते ॥३२॥ एकं वाक्यं प्रकरणं शाखाः सर्वाः सहैव वा । एकां विद्यामनेकां वा जनयन्तीति चिन्त्यते ॥३३॥ ससाधने हि पुरुषे जन्मना कर्मणा शुचौ । केवले वा यथायोगे प्रथमं तद्विचार्यते ॥३४॥ विचारपूर्वकं तस्य ब्रह्मभावाप्तियोग्यता । अधिकारे ततः सिद्धे विषयावधृतिस्ततः ॥३५॥ अन्तरऽगविचारेण गुणानामुपसंह्यतिः । बहिरङ्गविचारेण कर्मणामिति सा द्विधा ॥३६॥ फलतः साधनतश्च प्रमेयाच्च प्रमाणतः । विचारेणाबृहत् तच्च कोऽन्य साधयितुं क्षमः ॥३७॥

॥ इति श्रीमद्वल्लभाचार्यकारिकाः समाप्ताः ॥

## ॥ पंचश्लोकी ॥

गृहं सर्वात्मना त्याज्यं तच्चेत्यक्तुं न शक्यते ।
कृष्णार्थं तत्प्रयुंजित कृष्णोऽनर्थस्य मोचकः ॥१॥
संगः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते ।
स सद्भिः सह कर्तव्यः सन्तः संगस्य भेषजम् ॥२॥
अनुकूले कलत्रादौ विष्णोः कार्याणि कारयेत् ।
उदासीने स्वयं कुर्यात् प्रतिकूले गृहं त्येजत् ॥३॥
तत्त्यागे दूषणं नास्ति यतः कृष्णबहिर्मुखाः ।
अनुकूलस्य संकल्पः प्रतिकूल विसर्जनम् ॥४॥
करिष्यतीति विश्वासो भर्तृत्त्वे वरणं यथा ।
आत्मनैवेद्यकार्पण्ये षड्विद्या शरणागतिः ॥५॥

## ॥ विज्ञप्ति ॥

सहस्त्र परिवत्सरमित कालजात जन्मजन्मान्तरीय विकृत समाग्र्यौ सम्बन्धात् कषायस्य अपरिपक्व दशायाम् मूलबीज दग्धत्वात्, सर्वत्र परिभ्रान्ता अपि न कौऽपि परमानन्द सम्बन्धियो जाताः । येन तव स्वरुप विस्मरणात् तव वियोग जनित ताप क्लेशानंद तिरोभावः स्यात्, तेन येन केन प्रकारेण तव प्राकट्य रहस्यं विचार्य मम जन्मजन्मान्तरीय देहेन्द्रियप्राण अन्तःकरणानि तद्धर्मांश्च दारागारपुत्राप्तवित्तेहापराणि आत्मना सह सर्वे अणुसामग्र्यौ सह त्वया अग्निना सह सम्बन्ध अंगिकार कर्तव्या । यथा प्रथम अग्नि सम्बन्धे सर्व दाह पर्यन्तम् स्वयं एव अनुवर्तति तथा मम जन्मबीजस्य अन्तिमत्व सिद्ध्यर्थम् अस्मासु कृपा कर्तव्या । वल्लभ तवास्मि-वल्लभ मम अस्ति ।

श्री वल्लभाचार्यविरचिता

# श्रीमद्भागवतकारिका ।

## प्रथमस्कंधे प्रथमोध्याय :

वन्दे श्री कृष्णदेवं मुरनरकभिदं वेदवेदान्तवेद्यं, लोके भक्तिप्रसिद्ध्यै यदुकुलजलधौ प्रादुरासीद पारः । यस्याऽऽसीद्रूपमेव त्रिभुवनतरणे भक्तिवच्च स्वतन्त्रं शास्त्रं रूपं च लोके प्रकटयति मुदा यः स नो भूतिहेतुः ।।१।। कर्त्ता ज्ञः सकलस्य यो निगमभूः सर्वस्वरूपोऽपि सन्सर्वस्याऽपि विधारणो विजयते निर्दोषसर्वेष्टदः। यो लीलाभिरनेकधा वितनुते रूपं निजं केवलः सोऽयं वाचि ममाऽस्तु पूर्णगुणभूः कृष्णावतारः पतिः ।।२।।

श्रीमद्वल्लभविद्वदीशविलसद्वंशाब्धिपूर्णेन्दवे श्रीगोपीपति-वन्दिने सुमनसि ब्रह्मामृतस्यन्दिने । श्रीमल्लक्ष्मणभट्टसूरिरिति यन्नामाऽखिलाऽभीष्टदं तस्मै तात-महाशयाय हरये कुर्मो नमः सिद्धये ।।३।। श्रीमद्भागवतागमः सुरतरुर्लोके फलत्वं गतो भाषाभेदविभेदतस्त्रयमपि स्यान्नो विरुद्धं महत् । भक्त्यंशे फलता प्रमाणसुबले वेदत्वमर्थे पुनः स्कन्धै-र्द्वादशभिर्युतः सुरतरुः शाखाद्विवह्विद्वयम् ।।४।। अर्थं तस्य विवेचितुं न हि विभुर्वैश्वानराद्वाक्पतेरन्यस्तत्र विधाय मानुषतनुं मां व्यासवच्छीपतिः । दत्त्वाऽऽज्ञां च कृपावलोकनपटुर्यस्मादतोऽहं मुदा गूढार्थं प्रकटीकरोमि बहुधा व्यासस्य विष्णो प्रियम् ।।५।। लक्षणां नैव वक्ष्यामि न न्यूना-दन्यपूरणम् । आर्थिकं तु प्रवक्ष्यामि

परोक्षकथनादृते ।।६।। अविरोधेन सप्तानामर्थानामिह सङ्गतिः । उत्तरोत्तरदौर्बल्यं वाच्यं सङ्कोचतः परम् ।।७।। भाषात्रयविरोधश्च कल्पभेदात्समाहितः । भाषात्रयविभेदश्च लक्षणैर्ज्ञाप्यते पुनः ।।८।। अर्थत्रयं तु वक्ष्यमि निबन्धेऽस्ति चतुष्टयम् । अत्र सन्तः स्वसन्तोषैराज्ञां यच्छन्तु सिद्धये ।।९।।

## प्रथमस्कंधे द्वितियोऽध्यायः ।

कथाश्रवणभावेन मनोरथमहार्णवे । निमग्नान् सूतदानेन ह्युज्जहार ऋषीन् हरि ।।१।। फलसाधनरूपाणां निर्णयः कर्मणामपि । त्रयणां वक्ष्यतेऽध्याये द्वितियेऽन्यत्र शेषिणाम् ।।२।। जयो नाम पुराणादिः कृष्णद्वैपायनेरितः । अष्टादशपुराणानि भारतं तत्प्रकीर्तितम् ।।३।।

नारायणो व्यास इति वाच्यवक्तृस्वरूपकः । एक एव परो ह्यात्मा आदावन्ते निवेशितः ।।४।। उपासको नरश्चोक्तश्चकाराद्गुरुताऽपि च । अवश्यमेवकारेण सूत्रात्मा च नरोत्तम ।।५।। देवी भाग्यात्मिका नृणां वाक्यरूपा सरस्वती । सर्वे ते भगवद्रूपास्तस्मान्नम्या हि ते सदा ।।६।।

प्रथमस्कंधे तृतियोऽध्यायः ।

निरुपिता पञ्च लीलाः फलसाधननिर्णये । तृतिये त्ववशिष्टानामवताराार्थधर्मिणाम् ।।१।। कृष्णाऽवतारकार्यं हि न सूतो ज्ञातवान्स्फुटम् । अतः साधारणं प्रोक्त निर्णयश्च तथाऽधिकः षट् प्रश्नपूरणं तेन वस्तुतः पञ्चपूरणम् ।।२।। सत्त्वरूपशरीरेषु ब्रह्मणः संक्रमः स्मृतः । अशुद्ध शुद्धभेदेन शरीराणामतो द्विधा । कार्यकाले संक्रमणमावेश : सर्वदा परम् ।।३।।

## प्रथमस्कंधे चतुर्थोऽध्यायः ।

एवं भागवतार्थस्य निर्धारः स्वाधिकारतः । त्रिभिः कृतो द्वितिये तु त्रिभिस्त्याज्यसमत्वतः ॥१॥ मध्याधिकारे यच्छास्त्रं तदत्र विनिरूप्यते । नारदस्याऽधिकारित्वाच्छ्रोतुश्चिन्ताकुलत्वतः ॥२॥ तत्राऽध्याये चतुर्थे तु व्याससचिन्ता निरूप्यते । उत्तमप्रक्रियायाश्च वक्तुर्हेतुनिरूपणात् ॥३॥

## प्रथमस्कंधे पञ्चमोध्यायः ॥

चतुर्थे सर्वधर्माणां सन्देहो विनिरूपितः । निरूप्यते भक्तिमार्गो पञ्चमे तस्य निर्णयः ॥१॥ उट्टङ्कनं मध्यमत्वाद्दृष्टान्तस्य प्रदर्शनम् । आदावन्ते निर्णयार्थं हेतुत्वादुत्तरस्य हि ॥२॥

## प्रथमस्कंधे षष्ठोऽध्यायः ।

मध्यमेनाऽधिकारेण पदार्थो विनिरूपिताः । श्रवणस्य फलं चाऽन्तर्ज्ञानरूपं प्रदर्शितम् ।।१।। षष्ठे तु बाह्यं तस्यैव कीर्तनाऽवधि वर्ण्यते । बाह्याऽभावे त्वान्तरस्य व्यर्थतेति निरूप्यते ।।२।।

## प्रथमस्कंधे सप्तमोध्यायः ।

एवं त्रिभिर्मध्यमस्य स्वातन्त्र्येण निरूपणात् । नारद व्याससंवादं निरूप्याऽथोत्तमाऽभिधा ।।१।। त्रयोदशभिरध्यायैः साधकोऽयं प्रजापतिः । स्वतन्त्र उत्तमस्यैव साधिकोऽयं निरूप्यते ।।२।। द्वादशाङ्गैश्च सहितो ह्यधिकारो निरूप्यते । हेतुः षड्भिर्विरक्तिश्च तथा स्वातन्त्र्यमन्तिमे ।।३।। हेतुस्तु द्विविधः प्रोक्तः सामान्यः स त्रिधा मतः । विशेष पञ्चधा प्रोक्तः सप्तमे त्रितयं जगौ ।।४।।

## प्रथमस्कन्धे अष्टमोऽध्यायः ।

एवं हि सर्वभक्तानां भगवद्वाक्यनिष्ठता । सर्वहेतुकथा यैव सप्तमे विनिरूपिता ।।१।। अष्टमे यस्य वाक्यस्य करणाद्वृद्धि जायते । दोषश्चेत्तत्समाधानं गुणश्चेदाह पोषणम् ।।२।।

## प्रथमस्कंधे नवमोऽध्यायः ।

लोकप्रतीत्या कृष्णस्य यदा कार्यसमापनम् । तदा भागवतश्रोतुर्देहरक्षा निरूप्यते ।।१।। ऐहिकाऽऽमुष्मिकफले भक्तानां स्थानभार्ययोः । सर्वेष्टापूरणं चैव भगवत्कार्यसङ्ग्रहः ।।२।। श्रीमद्भागवतश्रोतृ रक्षापूर्वक्रियाऽखिला । निरूपिता ततो मध्ये भगवत्कार्यवर्णनम् ।।३।। नवमे स्वस्य भिन्नत्वं प्राप्तस्याऽभावसंशये

। स्वच्छन्दमृत्योस्तच्छान्त्यै मुक्तिर्भीष्मस्य वर्ण्यते ।।४।। पुरस्कृतोऽधमुत्सृज्य जह्याद्देहमितीरितः । राज्ञो मोहप्रसङ्गाय निवृत्तिश्चोपदेशतः ।।५।। भक्तोऽपि भगवद्द्रोहमाचरनरकं व्रजेत् । इति दर्शयितुं भीष्मशरपञ्जरसंस्थितिः ।।६।। तस्याऽप्युद्धारकः कृष्णो निजदत्ताधिया स्तुतः । इति स्तुतिस्तथाऽप्यस्य ताद्दग्रूपेण वर्ण्यते ।।७।।

प्रथम स्कंधे दशमोऽध्यायः ।

नैश्चिन्त्यसिद्धये विष्णोर्भीष्ममुक्तिर्निरूपिता । ऐहिके सर्वसौख्यं तु दत्तवाँस्तन्निरूप्यते ।।१।। पाण्डवानां यदूना च तदध्यायद्वयेन हि ।

निरूप्यं प्रथमं तत्र पाण्डवानां तदुच्यते ।।२।। कृष्णाधीनं सुखं यस्य स सुखीती निगद्यते । अतः कृष्णपरं चित्तं सर्वेषामत्र वर्ण्यते ।।३।।

## प्रथमस्कंधे एकादशोऽध्यायः ।

एवं कौरवभक्तानां सर्वसौख्यं निरूपितम् । द्वारकास्थितभक्तानामेकादश उदीर्यते ।।१।। प्रवेशे च प्रविष्टस्य स्थितस्याऽप्युत्सवस्त्रिधा । प्राकृतानामिव स्नेहः शास्त्रार्थे जानतामपि । कृष्णेच्छातस्तदित्युक्त्वा प्रत्यापत्तिर्निरूप्यते ।।२।। शङ्खनादस्तथा स्निग्धदर्शनं स्तोत्रमेव च । दूरान्मङ्गलमेतद्धि कलशादिस्तथाऽन्तिके ।।३।। दुःखिते नगरे कृष्णो न प्रवेशमिहाऽर्हति । अतः शङ्खनिनादेन सुखिनस्तान् करोति हि

।।४।। द्वारका जलदुर्गं हि तदन्ते नगरं महत् । आनर्त्ताख्यं तत्प्रवेशः पूर्वे पश्चात्पुरस्य हि ।।५।।

## प्रथमस्कंधे द्वादशोऽध्यायः ।

एवमैकाग्र्यसिद्ध्यर्थं सर्वं कार्यं निरूपितम् । अधुना श्रोतुदेहस्य रक्षणं विनिरूप्यते ।।१।। यथा वेदान्तविज्ञाने पश्चाग्नौ देहसम्भवः । तथा भागवतज्ञाने ब्रह्माग्नौ बोधसंयुते ।।२।। सर्वलक्षणसम्पन्नः सर्वदोषविवर्जितः । बीजसंस्कारसहितः श्रोता भागवते नृपः ।।३।।

## प्रथमस्कंधे त्रयोदशोऽध्यायः ।

एवं भागवतश्रोतुर्देहोत्पत्तिर्निरूपिता । पुरुषत्रयमुक्तिर्हि तन्मुक्त्यर्थं निरूप्यते ।।१।। पिता पितामहश्चैको धृतराष्ट्रस्ततः परः ।

प्रपितामहमुक्तिर्हि पूर्वं तत उदीर्यते ।।२।। ततोऽध्यायद्वयेनैव द्विरूपत्वात्पितामहे । सनिमित्तां मुक्तिमाह हेतुकार्यविभेदतः ।।३।। अमुक्तपितृका मुक्तिं नाप्नुवन्तीति वार्यते । अतो निश्चिन्ततासिद्ध्यै चित्तशुद्धिरिहोच्यते ।।४।। ततो द्वयेनेन्द्रियाणां राज्यशौर्यादिवर्णनैः । ततौ वैराग्यसत्सङ्गावधिकारः फलोन्मुखः । ततो भवति पुष्टोऽपि नाऽन्यथेत्यग्रिमा कथा ।।५।।

## प्रथमस्कंधे–चतुर्दशोऽध्यायः ।

एवं हि धृतराष्ट्रस्य मुक्तिमुक्त्वा त्रयोदशे । पाण्डवानामतो द्वाभ्यां हेतुपूर्वमुदीर्यते ।।१।। तेषां नेष्टो ब्रह्मभावः सायुज्यं परमीप्सितम् ।

तन्न स्याद्भूतले कृष्णे सखिभावेन बाधनात् ।।२।। अतश्चतुर्दशे हेतुं भगवदमनं महत् । यो वदेत्तस्य सन्दर्शः प्रश्नश्च विनिरूप्यते ।।३।। सम्भावनाया हेतुत्वं निश्चये किमुतेति च । भगवद्गमनं तस्मादुमयत्रोच्यते द्विधा ।।४।।

प्रथमस्कंधे पञ्चदशोऽध्यायः ।

एवं चतुर्दशे हेतुं सम्भाव्याऽथ विनिश्चयात् । कृतकार्यः शास्त्ररीत्या मुक्तोऽभूदिति वर्ण्यते ।।१।। भार्याभ्रातृभिरत्रैव सहितो मुक्तिमेयिवान् । पञ्चदशे महाराजः कृष्णभक्त्येति रूप्यते ।।२।। प्रेमोपकारज्ञानानि जिष्णौ राजार्थमाह हि । एनं दृष्ट्वैव राजाऽपि तथैवाऽभूद्यतः परः ।।३।। गुणस्वभावभेदेन कृष्णेनोपकृता वयम् । गुणैस्तु नवधा

योगात्स्वभावेन त्रिधा पुनः ।।४।। एवं द्वादशधा कृष्णः कृतार्थीकृत्य साम्प्रतम् । अवश्चयदिति ह्येकं तेनाऽन्यस्य च संक्षयः ।।५।। एवं चतुर्दशश्लोकैः पाण्डवेषु हरेर्गुणाः । तावद्भिरेव स्वज्ञातैश्चतुर्दशगतिं ययुः ।।६।।

## प्रथमस्कंधे षोडशोऽध्यायः ।

मुक्तिर्निरूपिता पूर्वमधिकारनिरूपणे । पारलौकिकबंन्धस्य निवृत्त्यै पितृहेतुतः ।।१।। ऐहिकस्याऽपि बन्घस्य निवृत्तिरधुनोच्यते । अधिकारस्य सम्प्रात्या लोकतो बन्धसम्भवः ।।२।। कलिदोषाश्च तेनाऽत्र क्रमेणैव निवार्यते । प्रथमं षोऽशाध्याये स्वाधिकारेण यद्भवेत् ।।३।। भूधर्मरक्षा सर्वाऽपि सामान्येन विशेषतः । निरूप्यतेऽन्यथा स्वस्य दोषः स्याद् द्विविधोऽपि हि ।।४।। अतः

पुत्रान् समुत्पाद्य धर्मरक्षा निरूप्यते । आधिदैविकरक्षार्थं कलिनिग्रह ईर्यते ।।५।। स्वभावतः स्थापितोऽपि भूलदोषान्न वर्द्धते । मुलनिर्हरणं तस्मात्कर्त्तव्यमिति निश्चयः ।।६।। आधिदैविकरूपाणां साक्षात्कारो यदा नहि । भगवच्चरितस्याऽपि दैविकत्वात्स नैव हि ।।७।। अतोऽधिकारसिद्ध्यर्थं दैविकानां निरूपणम् । अनुग्रहो निग्रहश्च वरदानं तथैव च ।।८।।

## प्रथमस्कंधे सप्तदशोऽध्यायः ।

ततः सप्तदशे धर्मपृथिवीसान्त्वनं विदः । भीतस्य स्थानदानश्च कलेः शिक्षा च रूप्यते ।।१।। प्रथमं मारणे भीतिस्तयोः स्वास्थ्यस्य च क्षयः । अतः सान्त्वनमग्रे च स्थानदानं विचारतः ।।२।। विवेकस्थापनायैव धर्मवाक्यं ततोऽस्य हि ।

सर्वसामर्थ्यसम्बोधो वैराग्यं वक्तुमद्भुतम् ।।३।। मूर्त्तीभूतास्त्रयो राज्ञे स्वखेदख्यापनाय तौ । वेषान्तरेऽपि तत्पीडाख्यापनाय स मारकः ।।४।। सन्धानं वस्तूभूतस्य कृतं तेनाऽस्य च स्वयम् । कृतं भूमेस्तु हेतूनां शोकस्य विनिवारणात् ।।५।।

प्रथमस्कंधे अष्टादशोऽध्यायः ।

अथाऽध्यायद्वयेनाऽस्य वृत्तमुत्तरमीर्यते । शापात्प्रायस्ततो राज्ये शापो वैराग्यबोधकः ।।१।। सङ्क्षेपकथनं पूर्वं श्रोतृप्रीत्यनुसारतः। विस्तारोक्त्यै तयोः श्रद्धा श्लाघा चाऽन्योन्यमीर्यते ।।२।। तादृशं फलवन्नाऽन्यदिति स्थापयितुं द्विजात् । शापस्तु हरिणा प्रोक्तस्तक्षकाग्रेरलौकिकात् ।।३।। ज्ञानिनो देहनाशाय नाऽन्यथाऽमृतवर्षणात् । यादवेभ्यस्तथोत्कर्षः शापमुग्धेभ्य ईर्यते ।।४।।

## प्रथमस्कंधे ऊनविंशोऽध्यायः ।

सर्वदोषनिवृत्तिस्तु पूर्वाध्याये निरूपिता । प्रमादेऽपीश्वरेच्छातो व्यामोहाभाववर्णनात् ।।१।। अधुना पूर्णगुणता वैराग्यज्ञानभक्तिषु । यशः कर्मसमाजश्रीभावेषु च निरूप्यते ।।२।। एकोनविंशे वैराग्यात्प्राये मुनिगणागमः । तत्र पृष्टार्थसन्देहे शुकागम इतीर्यते ।।३।। मुनयो भगवद्भक्त्यानं द्रष्टुं हरेः कथाम् । श्रोतुं ध भावितज्ज्ञानाद्विवादस्तु शुकोन्नतौ ।।४।। वैराग्यस्य प्रकर्षेण प्रकर्षोऽत्र विवक्षितः । ज्ञाने तुल्येऽपि देवर्षेस्त्यागाभावान्न वक्तृता ।।५।। भार्गवास्यऽपि रामस्य व्यासस्याऽपि हरेस्तनोः । गुरुणैव स्वरूपाप्तिज्ञानदानान्न वक्तृता ।।६।। द्वात्रिंशल्लक्षणोपेतः शुक एव ततो गुरुः । एतदर्थं हि भगवानवतीर्णो वृषध्वजः ।। बीजाधानोत्तरं रक्षा विष्णोरन्ते शिवात्मना ।।७।।

## द्वितियस्कंधे प्रथमोऽध्याय: ।

स्कन्धे तु प्रथमे प्रोक्तास्त्रिविधा ह्यधिकारिण: । तेषां कर्त्तव्यनिद्धारो द्वितीये विनिरूप्यते ।।१।। तस्मिन्निद्धारिते पश्चात् क्रियाविषयसङ्कथा । अग्ने च तां प्रवक्ष्यामस्तृतीयादिभिरुत्तमै: ।।२।। निद्धार्गणेऽङ्गत्रितयं वस्तुनिद्धारणं पुरा । श्रद्धा चैव विमर्शश्च वस्तुनिद्धारणं पुन: ।।३।। प्रमाणेन प्रमेयेण साधनेन फलेन च । एकत्र मानमेये हि फलं साधनमेकत: ।।४।। अतोऽत्र वस्तुनिद्धारि ह्यध्यायद्वितयं मतम् । श्रद्धाऽपि द्विविधा लोके श्रोतृवक्तृविभेदत: ।।५।। फलोपकार्यङ्गमेतन्नाऽधिकारे ततो विशेत् । विमर्शोऽपि द्विधा पूर्वमुत्पत्त्या चोपपत्तित: ।।६।। त्रिविधे द्वे ततस्तत्र षडध्यायास्ततो

दश । तत्र तु प्रथमेऽध्याये कर्तव्यं विनिरूप्यते । वस्तुनस्तत्वत्त्वनिर्द्धारो मानमेयविभेदतः ।।७।।

द्वितियस्कंधे द्वितीयऽध्यायः ।

मानमेयविनिर्द्धारस्तत्त्वार्थ विनिरूपितः । फलसाधननिर्द्धारो द्वितिये विनिरूप्यते ।।१।। द्विविधस्तत्त्वनिर्देशो बाह्याभ्यन्तरभेंदतः । बाह्यो निरूपितस्तत्र मानमेयपुरस्सरम् ।।२।। आन्तरं भिन्नमार्गेण फलसाधनबोधतः । अतः साधननिर्द्धारः प्रथमं क्रियते स्फुटः । पश्चात्फलस्य निर्द्धारस्ततस्तत्त्वं फलिष्यति ।।३।।

द्वितियस्कंधे तृतियोऽध्यायः ।

श्रोतव्यविषयत्वेन तत्त्वमेवं तिरूपितम् । उद्देशेनाऽस्य निपुणं साधनं विनिरूप्यते ।।१।। अदृष्टं साधनं वाच्यं दृष्टं चाऽप्यत्र सम्मतम् ।

अन्यथा क्रियमाणस्तु विमर्शो व्यर्थतां व्रजेत् ।।२।।
इन्द्रियाणामदुष्टत्वे ह्यनुकूले तथेश्वरे । साध्यं सम्पद्यते पूर्णमतोऽत्र द्वयमीर्यते ।।३।। श्रद्धाऽपि तदभिप्रायाच्छ्रोतुर्वक्तुश्च गम्यते । तस्मात्साधनसंयुक्तः श्रुणुयान्नेतरो वृथा ।।४।।

## द्वितियस्कंधे चतुर्थोऽध्यायः ।

साधनं द्विविधं प्रोक्तं क्रियाकर्तृविभेदतः । पूर्वाध्याये क्रियाङ्गानि वर्णितानि द्विरूपतः ।।१।। प्रश्नेऽप्युत्तरशेषत्त्वात् क्रियायाश्च निरूपणात् । स्वरूपतो ज्ञानतश्च कार्यसिद्धिर्यतो द्विधा ।।२।। साधनं श्रोतृवक्त्रो विमर्शाधक्रियातः । तदुच्यते मुख्ययोहि प्रश्नस्त्वाद्ये स्साधनः ।।३।। ज्ञात्वाऽथ नमनं देवे गुरावपि विशेषतः । सामान्यमुत्तरं यद्धि तद्वक्तुरधिकारकृत् ।।४।। अतोऽध्याये चतुर्थे तु परीक्षिच्छुक्रयोः

क्रमात् । विमर्षणाधिकारो हि विचाराङ्ग निरूप्यते ।।५।। व्यवसायात्मिका बुद्धिर्ममतात्याग एव च । कथाया: श्रवणे श्रद्धा संन्यासो ज्ञानमेव च । प्रश्नाश्चतुष्टयं पूर्व श्रोतुरङ्गमिहोच्यते ।।६।।

द्वितियस्कंधे पञ्चमोऽध्याय: ।

विमर्शः षड्भिराध्यायैः क्रियते स द्विधा मतः । उत्पत्त्या चोपपत्त्या च तत्राऽद्योऽपि द्विधा मतः ।।१।। स्थूलान्तर्यामिभेदेन मूर्त्तामूर्त्तविभेदतः । स्थूलोऽपि द्विविधस्तत्र स्थूलमूर्तविमर्शने ।।२।। उत्पत्त्या पञ्चमाध्यायः सोपपत्त्या निरूपकः । पुरुषः क्रमतः शक्तित्रयं गृह्णन्भवादिकृत् ।।३।। इत्युक्त्वा नारदाजाभ्यां जन्मभिर्नेति गद्यते । एकीभूते प्रवेशेने निर्गमादपि विह्वलः ।।४।। अथवा दार्ढ्यतासिद्ध्यै नारदः पृच्छति स्फुटम् । प्रश्नत्रयं नारदेन क्रियते तत्त्वनिर्णये ।।५।। आत्मनो

जगतश्चाऽपि निर्द्धारो भजनस्य च । द्वयोर्निर्द्धारशेषत्वं तेन प्रत्युत्तरं ततम् ।।६।। द्वितीयस्य द्विरूपत्वं बहिरन्तर्व्यवस्थया । विराजोऽन्तर्मुखत्वाद्धि विपरीतेन वर्ण्यते ।।७।। स्थूललिङ्गविभेदो वा तेनाऽध्यायद्वयं मतम् । प्रथमस्योत्तरं पश्चात्तदन्तर्यामिसम्भवे ।।८।।

## द्वितियस्कंधे षष्ठोऽध्यायः ।

अनित्यं जननं नित्ये परिच्छिन्ने समागमः । नित्यापरिच्छिन्नतनौ प्राकट्यं चेति सा त्रिधा ।।१।। उत्पत्तिः स्थानसम्बन्धरूपा षष्ठे निरूप्यते । स्थूलस्याऽमूर्तरूपस्य तदभेदद्दशिः फलम् ।।२।। नारायणपरा वेदा इत्यनेन निरूपितम् । सामान्येन तदेवाऽत्र विस्तरेण निरूप्यते ।।३।। पौरुषेण च सुक्तेन निर्धारितमिहोदितम् ।

कार्यस्य वस्त्वभेदोऽपि माहात्म्यं परतस्तथा ।।४।। अमूर्त्तरूपं साधर्म्यं सर्वत्रैव हरेर्बृहत् । तेन सिद्धो वस्त्वभेदः स्थूलं ध्यानं च सिद्धयति ।।५।।

द्वितियस्कंधे सप्तमोऽध्यायः ।

एवमात्मातिरिक्तामुत्पत्त्या निर्णयः कृतः । आत्मनोऽपि हरेरत्र निर्णयो विनिरूप्यते ।।१।। सूक्ष्मध्यानं पूर्वमुक्तं तस्याऽत्र विवृतिः स्फुटा । सप्तमे क्रियते येन तद्धर्मा वस्तुतो मताः ।।२।। उपासनायां सर्वस्य हरेर्धर्मस्य निर्णयः । स्वरूपगुणभेदेन बोधनार्थमिहोच्यते ।।३।। मुख्यस्य च फलं त्वत्र निर्णीतं विनिरूप्यते । महात्म्यादि तदङ्गं च विशिष्टं तेन सिद्धयति ।।४।।

## द्वितियस्कंधे अष्टमोऽध्यायः ।

एवं निर्द्धारभजनमुत्पत्त्या च विमर्शनम् । द्वयं सिद्धं विराड्ब्रह्मरूपयोस्तत्त्वनिश्चये ।।१।। उपपत्या विमर्शस्तु त्रिमिरद्य निरूप्यते । आक्षेपसिद्धान्तफलैः सोपपत्तिस्त्रिधा यतः ।।२।। अष्टमे सन्दिहानस्य प्रश्न आक्षेपगर्भितः । राज्ञो निरूप्यते प्रश्नास्तन्मूला अपरेऽपि च ।।३।।

## द्वितियस्कंधे नवमोऽध्यायः ।

नवमे तूत्तरं ग्राह जीवब्रह्मस्वरूपयोः । सन्देहवारकं पूर्वकथनस्याऽपि वस्तुताम् ।।१।। पारम्पर्यकथा चाऽस्य शुद्धयाधिक्यवगम्यते । नाऽन्यथेत्यस्य सन्देहनाशनाय निरूपिता ।।२।।

## द्वितियस्कंधे दशमोऽध्यायः ।

इत्याक्षेपसमाधाने निरुप्य हरिजीवयोः । उपपत्त्या तयोरेव रूपदेहाविहोदितौ ।।१।। दशधा ज्ञायते रूपं हरेरन्यत् त्रिधा मतम् । आध्यात्मिकादिभेदेन गुणतः कर्मतोऽपि हि ।।२।।

## तृतियस्कंधे प्रथमोऽध्यायः ।

अधिकारिषु साङ्गं हि श्रवणं सुनिरूपितम् । स्कन्धद्वयेन शेषेषु क्रियते विषयाभिधा ।।१।। त्रयस्त्रिंशदथाऽध्यायास्तृतीये सर्ववर्णने । स्वाभिप्रेते सविशेषे हरेर्माहात्म्यसूचके ।।२।। लोके सर्गविसर्गौं हि यादृशौ नेह तौ मतौ । किन्तु तौ लीलया वाच्यौ तेन स्कन्धद्वयं ततम् ।।३।। भूतमात्रेन्द्रियधियां जन्मसर्ग उदाहृतः । ब्रह्मणो

गुणवैषम्यादिति सर्गस्य लक्षणम् ।।४।। अत्रार्थो द्विविधोऽप्यस्ति विवक्षित इति स्फुटः । ब्रह्मतो जायते सर्गो ब्रह्मार्थे क्रियते परः ।।५।। अतोऽत्र द्विविधः सर्गः श्रुतिसाङ्ख्यानुसारतः । भूतमात्रेन्द्रियधियः प्रथमे त्रिविध मताः ।।६।। अधिकारे हरौ कार्ये सत्वादिगुणभेदतः । अतश्चतुर्णामुत्पत्तौ द्वादशाध्यायवर्णनम् ।।७।। ततोऽत्र युक्तरूपस्य ब्रह्मणौ विनिरूपणम् । गुणवैषम्यकथनं षडध्याय्या निरूप्यते ।।८।। कर्मादिमार्गा वेदोक्ताः फलतस्ते यदि स्थिराः । सर्गोऽत्र नैव जायेत ततस्तन्नाश उच्यते ।।९।। कामेन कर्मनाशः स्यात् क्रोधेन ज्ञाननाशनम् । लोभेनापि च भक्तेहि धर्मिज्ञानीश्वरैः कृताः ।।१०।। ततो गुणानां वैषम्यं तमः सत्त्वरजस्त्वतः । एवमेकोनविंशत्या हरिकर्तृक ईरितः ।।११।।

चतुर्दशभिरध्यायैर्हरये सर्ग उच्यते । गुणवैषम्यमेकेन भगवद्भोगसिद्धये ।।१२।। भूतमात्रेन्द्रियधियां जन्म भोगाय देहतः। चतुर्भिरुच्यतेऽध्यायैर्नवभिश्च गुणास्त्रयः ।।१३।। यादृशैर्भगवद्भोगस्तेषां सर्गो निरूप्यते । कथायां त्वधिकारोऽत्र चतुर्भिः करणं परैः ।।१४।। सर्गस्य सविभूतेश्च सर्वत्रैवानुवर्णनम् । उत्तमे त्वधिकारे हि लीलामात्रं फलाय वै ।।१५।। किं पुनर्दशधा लीलेत्येवं वैदुरिकी कथा । तत्राऽधिकारे प्रथमे देहवैशिष्ट्यकारणम् ।।१६।। भूतानां संस्कृतानां हि त्रेधा सर्गो निरूप्यते । तीर्थसङ्गगुणस्मृत्या पञ्चधा वा निरूप्यते ।।१७।। तीर्थद्वयेन हरिणा भक्तस्तत्कथयाऽपि च । अस्मिन् भागवते शास्त्रे पूर्वदेहस्य नाशनम् ।। नापेक्ष्यते यतः सर्वे भक्तिमार्गाधिकारिणः ।।१८।।

## तृतियस्कंधे द्वितियोऽध्याय: ।

अधिकार्थसर्गो हि भूतसर्गो निरूपित: । मात्राणामेव सर्गोऽत्र द्वितीये विनिरूप्यते ।।१।। मुख्याधिकारिणो भक्तौ क्रियाज्ञानविभेदत: । अलौकिकचरित्रेण माहात्म्यं विषयो मत: ।।२।। क्रिया तु भगवत्येव नाऽन्यत्रेति निरूप्यते । षड्भिस्तु मनसा तानि षट्कर्माणीन्द्रियैर्यत: ।।३।। षड्गुणैश्वर्यसम्पन्नौ भगवानेक एव स: । सप्ताधिकेन विंशत्या तावन्तो भगवद्गुणा: ।।४।। तत्त्वतो विषया: प्रोक्तास्ते देवा: सर्व एव हि । कथायां त्रिभिरध्यायैरधुनोत्तरमुच्यते ।।५।। सामान्यकुशले त्वेव त्रेधाऽप्युत्तरमुच्यते । लोकद्वये च भक्तौच दुर्भाग्या यादवा इति ।।६।।

## तृतियस्कंधे तृतीयोऽध्यायः ।

तृतिये मध्यचरितं कृष्णस्य विनिरूप्यते । इन्द्रियाणां तथा सर्गमधिकारस्य पोषकम् ।।१।। आविर्भूतो हि भगवाँस्तत्त्वान्येव प्रवर्तयन् । सर्वां सृष्टि वितनुते तावन्तोऽत्र ततो गुणाः ।।२।। दशेन्द्रियाणि चत्वारि मन आदीनि देवताः । अष्टाविंशतिरूपाणि निरूप्यन्ते ततोऽत्र हि ।।३।।

## तृतियस्कंधे चतुर्थोऽध्यायः ।

चतुर्थे ह्यधिकारार्थं बुद्धिर्भगवतोच्यते । पञ्चधा साऽत्र सम्प्रोक्ता पञ्चपर्वाधिकारिणाम् ।।१।। स्वरूपं च गुणाः प्रोक्ता फलमत्र निरूप्यते । एतादृशे हि पुरुषे भगवानाविशेद्यतः ।।२।। तदैव

तद्‌गताः सर्वेबुद्धयन्ते नाऽन्यथा यथा । अतो भगवतः सर्गे हेतुश्चाऽयं निरूप्यते ।।३।।

तृतीयस्कंधे पञ्चमोऽध्यायः ।

चतुर्णां सर्ग आद्योऽत्र ह्यधिकारे निरूपितः । पुरुषत्वाय कृष्णस्य चतुर्भिः सर्ग ईर्यते ।।१।। स एव भगवल्लीलां श्रोतुमर्हति तत्त्वतः । अन्यथाऽन्यो हि मनुते ह्यधिकारस्ततो हितः ।।२।। कृष्णार्थसृष्टौ भूतानि जातान्येवेति निश्चयः । वेदे पञ्चमिरेवाऽस्य पुरुषत्वकथोदिता ।।३।। त एव बहुधा व्यस्तास्तस्मात्तत्वानि तानि वै । भोगः शरीर एवेति मात्रास्तत्र निरूपिताः ।।४।। नानाविधानि

शास्त्राणि तैः सन्देहविनिश्चयौ । मनो भगवतो ह्युक्तं तेनैवेन्द्रियसंकथा ।।५।। बुद्धिर्भगवतो ब्रह्मा तत्कार्यं च निरूप्यते । स्तुतिप्रसादौ कार्याणां भूतानीत्येष निश्चयः ।।६।। ततस्तेषां शरीराणि मात्रा एव हरेर्यथा । काल एवेन्द्रियाण्येषां तत्राऽऽसक्तो म्रियेत वै ।।७।। बुद्धिस्तेषां महात्मानो वेदा मन्वादयस्तथा । तत्रोक्तेरेव यद्युक्तमुक्तं तेषां हिताय तत् ।।८।। कार्योपयोगितत्त्वानां पञ्चमे विनिरूप्यते । उत्पत्तिर्यादृशैः कार्यं तद्भावश्च निरूप्यते ।।९।। प्रश्नाभिनन्दने चाङ्गं सर्वत्रैव हरेः कृतौ । अतोऽत्र भगवत्प्रश्नः षड्विधो विनिरूप्यते । वैराग्यादिः सृष्टिमार्गे विपरीतप्रवेशतः ।।१०।।

## तृतीयस्कन्धे षष्ठोऽध्यायः ।

एवं भगवतः सृष्टो भूतोत्पत्तिर्निरूपिता । कालोत्पत्त्यर्थमधुना ब्रह्माण्डोत्पत्तिरूच्यते ॥१॥ स्वशक्तिदानभोगौतु विषयत्वार्थमुच्यते । विषयानन्त्यसिद्ध्यै हि माहात्म्यं विनिरूप्यते ॥२॥ एवं भगवतो मात्राश्चतुर्द्धा विनिरूपिताः । स्पर्शो भगवतो नाऽस्ति तद्भावाद्देहवद्भुजिः ॥३॥

## तृतियस्कन्धे सप्तमोऽध्यायः ।

हरेरिन्द्रियवर्गस्य मनसः सर्ग उच्यते । संकल्पेन विकल्पेन द्विधा तद्विनिरूप्यते ॥१॥ संकल्पो निश्चयः प्रोक्तः स च सन्देहपूर्वकः । अन्यथा ज्ञानमेव स्यात् तदर्थ प्रथमो द्विधा ॥२॥ विकल्पो

विविधः पक्षस्ते प्रश्ना इह रूपिताः । अत्र सर्वाणि कार्याणि पृष्टानि भगवत्कृतिम् । ज्ञातुम, सा मनसा भाव्या पूर्वं चाऽपि कृतौ मनः ॥३॥

## तृतियस्कन्धे अष्टमोऽध्यायः ।

अष्टमे भगवद्बुद्धिर्यादृशी साऽत्र वर्ण्यते । आधाराधेयरूपाणां तदीयां तथोद्गमः ॥१॥ षड्विधा भगवद्बुद्धिः, स्वरूपे रतिरूपिणी । जगद्विषयिणी चैव कृतियुक्तेति वै त्रिधा ॥२॥ हरेरेव, तथाऽन्यापि भगवद्विषया त्रिधा । लौकिकोपायजनिता प्रथमा सा द्विधा पुनः ॥३॥ तर्कक्रियाविभेदेन द्वितिया वैदिकी स्मृता । साक्षात्कारस्तृतीयस्तु षट्सु सर्वं प्रतिष्ठितम् ॥४॥ सामान्यतो ग्रन्थरूपा भगवद्बुद्धिरीर्यते । सर्गोपयोगिनी, यस्मात्तामसादुद्गता हि

सा ।।५।। अनेकधा भागवतप्रवृत्तिरूपयुज्यते । दशलीलायुताः सर्वाः कल्पभेदैर्व्यवस्थिताः । भगवद्बुद्धिरेषेति सैव लीलाद्वये तता ।।६।।

## तृतियस्कन्धे नवमोऽध्यायः ।

जीवसर्गो भूतसृष्टो ब्रह्मज्ञानं तदुच्यते । पञ्चविंशतितत्त्वानां स्वरूपस्य च बोधतः ।।१।। अतोऽत्र नवमेऽध्याये स्तुतिसंप्रार्थने पुरा । ततः सर्वोपदेशश्च भगवत्कृत ईर्यते ।।२।। ज्ञानमार्गस्य निर्द्धारः स्तोत्रेऽस्मिन् क्रियते स्फुटः । विषयः, साधनं, रूपं बाधाभावस्तथैव च । प्रकीर्णकं च स्तोत्रेऽस्मिन् ज्ञानार्थं विनिरूप्यते ।।३।।

## तृतियस्कन्धे दशमोऽध्यायः ।

जगतो भूतसर्गस्तु ब्रह्मा सोऽत्र निरूपितः । भगवत्कृपया युक्तस्तादृशाऽस्य निदानता ॥१॥ मात्राणि सर्वरूपाणि दश सृज्यान्यतोऽत्र वै । दशमे विनिरूप्यन्ते मात्रात्वं चापि कालतः ॥२॥ कालेनैव गृहितास्ते भोग्याः, भोक्ताऽन्यथा तु सः । भूतानामत्र संबन्धो रूपणार्थ कृति पुरा । ब्रह्मणा निर्मिता, प्राह द्वयं मात्रेति रूप्यते ॥३॥

## तृतियस्कन्धे एकादशोऽध्यायः ।

एकादशे तु कालस्य सर्वेषामिन्द्रियाणि यत् । आध्यात्मिकं तु यद्रूपं त्रेधा तद्विनिरूप्यते ॥१॥ सर्वो हि भगवान् कालस्तदर्थमुपचर्यते ।

धर्मप्रयुक्तो यः कालः स हि ब्रह्माणमेयिवान् ।।२।। सूर्यात्मकस्तु यः
कालः सर्वेषां सोऽपि च त्रिधा । कायप्रवेशाप्रवेशाद्दर्शनादर्शनात्तथा
।।३।। भचक्रस्थानभागाभ्यामत्राऽप्युश्चावचं सदा ।।४।।

तृतियस्कन्धे द्वादशोऽध्यायः ।

साधारणानां बुद्धिर्या द्वादशे सा निरूप्यते । अष्टधा सा सर्गरूपा
श्रेष्ठा चोत्तरतः परा ।।१।। तामिस्त्रादिप्रकारेण प्रथमा प्राकृति मतिः
। ज्ञाननिष्ठा द्वितीया स्यात् सदोषा सा प्रकीर्तिता ।।२।। दोषोऽप्यत्र
हरेः सङ्गात्, ज्ञानादप्यधिका मता । यथा हरस्ततः श्रेष्ठा
कृष्णस्याऽऽज्ञानुपालिनी ।।३।। सदोषा साऽपि, तस्यास्तु दोषे न
प्रविशेद्धरिः । ततो हीनैव सा, मध्ये लोके व्यामोहिका परा ।।४।।

ततो वेदे विनिष्णाता तदर्थे कर्मणि स्थिता । ततः श्रेष्ठा वेद एव योगोपासनया युता ।।५।। सर्वतोऽप्युत्तमा या तु क्रीडेच्छापूरिका हरेः । एवमष्टविधा बुद्धिः सर्वेषां सर्गयोगिनी ।।६।।

तृतियस्कन्धे त्रयोदशोऽध्यायः ।

एवं द्वादशधा सर्गस्त्रिविधो ह्युपपादितः । तस्य कारणरूपं हि यादृशं तदिहोच्यते ।।१।। सर्ववेदार्थरूपो हि वराह इति विश्रुतः । स एव कारणं सृष्टौ वैदिक्यामिति निश्चयः ।।२।। अन्यथा प्राकृति सृष्टिः, स्वप्नतुल्यैव सा भवेत् । अतो वैदिकसृष्टित्वज्ञापनाय वराहता ।।३।। भूमिस्तु देवयजनं रोमभिर्बर्हिषो भवः । पात्राणि सर्वावयवैस्तेन यज्ञस्त्रयोदशे ।।४।। सृष्ट्यर्थं, तस्य भवनमित्यर्थं,

संगतिस्तथा । ब्रह्मणा सह संवादो मनोः कल्पान्तरे पुनः ।।५।।
रसातलान्तपर्यन्तं पृथिवी पूर्वमुद्धृता । पश्चाङ्गुल्या पञ्च लोका
ह्युद्धृता अतलादयः ।।६।। यज्ञभूमित्वसिद्ध्यर्थं पुष्करे प्रथनं ततः ।
एषा स्थितिः पूर्वकल्पे, रसातलगता ततः ।।७।।
प्रजापतेरुद्धृतत्वान्निराधारा जलं विशेत् । वराहकल्पे प्रथमे
सर्वोत्पत्ति र्विनिश्चिता ।।८।। ततस्तद्भेदकल्पेषु नष्टोत्पत्तिर्न सर्वतः ।
प्रक्रियान्तरभावेन ततः सृष्टिरिहोच्यते ।।९।। हिरण्याक्षादिदैत्यानां
रसातलगता स्थितिः । अपेक्षितानामर्थानां भिन्नकल्पेऽपि संभवे
।।१०।। लीलाकथनसिद्ध्यर्थमेकरूपेण वर्ण्यते । अतो नाऽत्र
विरोधोऽस्ति केनाऽप्यंशेन निश्चितम् ।।११।।

## तृतियस्कन्धे चतुर्दशोऽध्यायः ।

वर्णिता सर्गलीलाऽत्र त्रिविधा भगवत्कृता । उपोद्धातस्तु तस्या वै, मतान्तरमिहोच्यते ।।१।। लौकिकी चाऽन्यभाषा च समाधेः पोषिके तु ते । ते प्रमाणमभिप्रायात् सर्वथा पूर्ववन्न हि ।।२।। यदेव भिन्नरीत्याऽत्र रूप्यते तन्मतान्तरम् । न तद्विरोधो दोषाय पदशास्त्रार्थयोः क्वचित ।।३।। कामेन क्रोधलोभाभ्यां कर्ममार्गादिनाशनम् । वर्ण्यते येन जीवानां मुक्तानामिह सम्भवः ।।४।। सर्गस्थित्यन्तकथनं त्रिभिस्तेषां निरूप्यते । अतः षड्भिरिहाऽध्यायैः सर्गोपोद्धात उच्यते ।।५।। मतान्तरे शिवोत्कर्षा ब्राह्मणोत्कर्ष एव च । भक्तस्य विष्णोश्शैवाऽत्र लीला व्यामोहिका मता ।।६।। अन्यथा भगवल्लीला सर्गो नैव भवेद् ध्रुवम् । चतुर्दशे तु कामेन कर्मनाश इहोच्यते ।।७।।

आधारकथनं त्वादौ गर्भे जीवस्य संक्रमः । तामसः काम एषो हि ततोऽत्र शिवसंकथा ।।८।। क्रोधोऽपि कामसम्बन्धी प्रसादो भक्तिहेतुकः । पूर्वाध्याये वराहस्य चरित्रं तु निरूपितम् ।।९।।

तृतियस्कन्धे पञ्चदशोऽध्यायः ।

निरूप्यते पञ्चदशे क्रोधेन ज्ञाननाशनम् । बीजे जीव प्रवेशार्थं भक्तशापोऽनुवर्ण्यते ।।१।। इतिहासप्रवृत्त्यर्थं सङ्गतिश्चाऽपि रूप्यते । ज्ञानमूलस्य सत्त्वस्य कार्यनाशकता पुनः ।।२।। वैकुण्ठे वृक्षपक्षीणां स्त्रीणां चापि न मत्सरः । सर्वदोषविहीनत्वात्तत्र दोषो हरीच्छया । अतः सृष्टिप्रसिद्ध्यर्थं वैकुण्ठस्य च वर्णनम् ।।३।।

तृतियस्कन्धे षोडशोऽध्यायः ।

मुनिमानससंतोषस्ततः स्तोत्रं तथाविधम् । शापस्थापननिर्याणे षोडशे विनिरूप्यते ।।१।। भक्तानां तु कृतिः सत्या वाक् सत्या ब्रह्मवादिनाम् । मनो भगवतः सत्यमित्यध्यायविनिर्णयः ।।२।। मनसः प्रबलत्वाद्धितेषां नान्यविरोधिता । पूर्वयोरनभिप्रेतं तृतीयादेव सुस्थिरात् । अतो भगवतः सर्गलीलायां दुर्बलार (ऽव) तिः ।।३।।

## तृतीयस्कन्धे सप्तदशोऽध्यायः ।

कामादिना मार्गनाशा उपोद्घातेन वर्णिताः । सृष्टिमात्रप्रयोगाय तत्फलं वर्ण्यते शुभम् ।।१।। उत्पत्तिस्तामसी प्रोक्ता स्थितिर्वै राजसी मता । सात्त्विकः प्रलयश्चेति विपरीतं फलं तयोः ।।२।। उत्पत्तिर्द्विविधा प्रोक्ता स्वरूपानिष्टभेदतः। यावद्वृद्धिरिहोत्पत्तिः, कायवाग्दोषवर्णनम् ।।३।।

सजातीयविजातीयक्लेशदानाय जन्मनः । शापस्त्वेक इति प्रोक्तो हिरण्याक्षो न चाऽपरः ।।४।। आधारस्तु स एवोक्तो द्वितिये दोषवर्णनम् । उत्पत्तिरेव शापेन नीचयोनौ निरूपिता ।।५।। स्थितिनाशौ तयोस्तस्माद्धरावेवाऽत्र वर्ण्यते । कृष्णेन सहिता लीलाः स्थितिस्तस्य महात्मनः ।।६।। निधनं चाऽपि तस्यैव कल्याणवचनान्मतम् । स्वरूपोत्पत्तिरन्यत्र हेतुरित्युच्यते बहु ।।७।। अनिष्टसूचकं तत्र ज्ञानं दुःखप्रणाशनम् । अतः सप्तदशेऽध्याये दुःखाभावस्तथोद्गमः । अनिष्टसूचनं दोषौ वर्ण्यन्ते पश्च सम्भवे ।।८।।

## तृतीयस्कन्धे अष्टादशोऽध्यायः ।

अष्टादशे स्थितिस्तस्य भगवत्सन्निधौ स्फुटा । निरुप्यते, तथा शापात्पारुष्यं विजयस्ततः ।।१।। स्थित्यध्यायोऽयमाख्यातो ब्रह्मणा तत् स्थिरीकृतम् । उत्पत्तावेव शापो हि मारणं ब्रह्मवाक्यतः ।।२।।

युद्धमात्रे हरीच्छा हि कायवाङ्मनसा तु सा । उभयोरुद्यमोक्त्यैव युद्धं मानसमीरितम् ।।३।। कायिकं चाऽग्रिमाध्याये मध्यमं मध्यमे मतम् । अतो विरोधवाक्यानामुभयेषां न दूषणम् ।।४।। प्रसङ्गो दर्शनं वाक्यं त्रिभिर्भक्तानुरोधनम् । पुनराक्षेपवाक्यं च शरव्यकरणं तथा ।।५।। वाक्योपक्रमणं वाक्यं त्रिभिर्मानस्तथोद्यमः । युद्धं षड्भिर्मगवत्त्वात् ब्रह्मप्रार्थनमन्ततः ।।६।। उभयोर्वचनं षड्मिर्युद्धं चैव तथोभयोः । स्थितिरेषा तस्य हरौ तत्पोषकमिहाऽपरम् ।।७।।

## तृतियस्कन्धे एकोनविंशोऽध्यायः ।

एवं स्थितिर्हरौ तस्य पूर्वाध्याये निरूपिता । प्रलयो ब्रह्मणो वाक्यात् भगवत्कृत ईर्यते ।।१।। एकोनविंशे भगवान् क्रीडन्निव महासुरम् । सुराणां महदर्थाय हतवानिति वर्ण्यते ।।२।।

## तृतियस्कन्धे विंशोऽध्याय:

भगवत्कृतसर्गस्तु सोपोद्धातो निरूपित: । चतुर्दशमिरध्यायैरुच्यते हरये पर: ।।१।। गुणवैषम्यभावेन सर्गा: पूर्वं निरूपिता: । गुणवैषम्यभावोऽत्र द्विविधो वर्ण्यते स्फुट: ।।२।। आधिदैविकभावोऽत्र नाऽस्तीति द्वैधवर्णनम् । आधिभौतिकमेकेन चतुर्मिश्च तथा परम् ।।३।। भूतमात्रेन्द्रियधियां हरौ ज्ञानोपयोगिनाम्। गुणा: स्वभावत: केऽत्र पुष्टिमार्गोपयोगिन: ।।४।। निरूप्यन्ते हरेरुक्ता: प्रत्येकं त्रिविधा यथा । आधिदैविकमाध्यात्मामाधिभौतिकमेव च ।।५।। चतुर्भिश्च चतुर्भिश्च तथैकेनोच्यते क्रमात् । भक्तिसाङ्ख्ययात्मविज्ञानयोगैश्चत्वार आद्यके ।।६।। आध्यात्मिक: काल एव माहात्म्यकरणे तथा ।

तदधीनं जगत्सर्वमित्यथाऽस्तु द्वितीयके ।।७।। मुक्त एव हरेरर्थे भूतत्वेनोपयुज्यते । अतो मुक्तिः स्त्रियाश्चैव पूर्वेषु द्विविधेष्वपि ।।८।। धर्मादयोऽपि द्विविधास्तत्रोच्यन्ते क्रमादिमे । सर्गे तेषामनुत्पत्तौ मार्गस्तेषां न वै भवेत् ।।९।। यादृशा भगवन्मार्गे जीवचिन्तनचिन्तिताः । एकविंशतिमिस्तेऽत्र निरूप्यन्ते क्रमात् स्फुटाः ।।१०।। भगवच्चिन्तिता ये वै पञ्चविंशतिभिस्तु ते । अन्यत्सर्वं कालकृतं चत्वारस्तेऽपि वर्णिताः ।।११।। त्रिविधा अपि तेऽप्युक्ता मुख्यो मोक्षस्तथान्तिमः । मूलम्, सर्गस्त्रयाणां तु मुख्यो मोक्षः फलं तथा ।।१२।। चतुर्दशभिरध्यायैरतः सर्गो निरूपितः । तद्विशतितमेऽध्याये सङ्कीर्णः सर्ग उच्यते ।।१३।। षड्विधो हरिकार्यार्थमत्रोक्ताः सकला हरौ । सर्गमेकविधं ज्ञात्वा विसर्गे प्रश्न

ईद्दशः ।।१४।। तथापि शास्त्रमेवाऽत्र वक्तव्यमिति निश्चयः ।
अभिप्रेतं न तस्याऽपि तथैवेत्यन्यथोच्यते ।।१५।। प्रश्नद्वयं तु कुरुते शौनकः प्रकृतौ महान। विसर्गविषयं त्वाद्यं भक्तानां तु तथा परम् ।।१६।। एकेन्न पञ्चमिश्चैव मूलारम्भो हि भेदकः । परीक्षिच्छुकयोरत्र विरामो नैव दृश्यते । सूत एव ततो वक्ता तुल्यार्थत्वान्न दूषणम् ।।१७।।

## तृतीयस्कन्धे एकविंशोऽध्यायः ।

एकविंशे तु सफलो धर्ममार्गो निरूप्यते । भूतसंस्कारकर्तुत्वाद्भूतसर्गोऽयमुच्यते ।।१।। षड्विधं रूपमस्याऽपि तपोदर्शनसंस्तवाः । त्रिविधाः कारणे युक्ता वाक्यागमसमृद्धये: । फलेऽपि त्रिविधाः प्रोक्ता ऋषिवाक्यं समृद्धये ।।२।।

## तृतीयस्कन्धे द्वाविंशोऽध्यायः

द्वाविंशे कर्दमस्याऽर्थः सिद्धस्त्रीधनरूपवान् । अयमेवेन्द्रियगणः कृष्णार्थ सुविनिश्चित ।।१।। अर्थस्य सत्त्वं चाख्यातुं मनोधर्मस्य वर्णनम् । भगवत्कृपयैवार्थ उत्तमो नान्यथेति च ।।२।। आकूतिः पुत्रिकात्वेन दत्ता येन निजेच्छया । स एवात्यन्तदैन्येन देवहूतिं प्रयच्छति ।।३।। कृतकृत्यं च मनुते ततो धर्म च सेवते । यज्ञश्रवणभेदेन द्विरूपमपि सर्वदा ।।४।।

## तृतीयस्कन्धे त्रयोविंशोऽध्यायः ।

कर्दमस्य हि कामोऽत्र स्वीकृतत्वात्तदिच्छया । त्रयोविंशतिमेऽध्याये वैराग्यवधिरूच्यते ।।१।। भगवद्भोगसृष्टौ हि पूर्व मात्रा निरूपिताः । तद्ग्राहकाणीन्द्रियाणि निरूप्यन्तेऽधुना स्फुटम् ।।२।।

भगवत्कृतभोगो हि नाल्पसत्त्वेन भुज्यते । अतस्तस्या योग्यतायै पतिसेवा निरूप्यते ।।३।। ततः प्रसादो विज्ञप्तिर्भोग्यसाधननिर्मितिः। अन्तः स्थितहरेर्ज्ञप्त्या तथात्वज्ञापनं तथा ।।४।। भोगो नानाविधश्चैव सर्वभावेन चैव हि । भार्येच्छया कन्यकानां जननं चाऽपि वर्ण्यते । वैराग्यमुभयोश्चैव कामस्तेनैव पूर्यते ।।५।।

### तृतियस्कन्धे चतुर्विंशोऽध्यायः ।

चतुर्विंशे तथाऽध्याये मोक्षो बुद्धिश्च वर्ण्यते । कपिलो हि हरिर्बुद्धिरुपदेशो भजिस्तथा । ऋणत्रयपरित्यागो मोक्षार्थं तस्य वर्ण्यते ।।१।।

## तृतीयस्कन्धे पञ्चविंशोऽध्यायः ।

उक्तश्चतुर्भिरध्यायैः सप्रसङ्गो हरेर्भवः । ज्ञानरूपं चरित्रं तु नवभिः स्वस्य वर्ण्यते ।।१।। प्रकाराः सगुणा सर्वे नवाऽध्यायास्ततोऽत्र हि। नवभावं गता सापि तदन्ते त्वभवो भवेत् ।।२।। भगवद्रूपनिष्पत्तौ भक्तिर्भूतानि सर्वथा । मात्रास्तत्त्वानि सर्वाणि भुक्ते सर्व यतो हरिः ।।३।। आत्मा तस्येन्द्रियं प्रोक्तं येन सर्व स पश्यति । योग एव हरेर्बुद्धिस्तस्मात्सर्व प्रकाशते ।।४।। पञ्चविंशे तथाऽध्याये भक्तियोगो निरूप्यते । वैतृष्ण्यं तस्य चाऽङ्गं हि इतरज्ञानमेव च ।।५।। परमं साधनं भक्तिर्यथा भवति मुक्तये । यथा शास्त्रस्य कथनं सन्तो भक्तेश्च साधकाः

।।६।। वंश एव मनोः पृष्टस्तेन ज्ञानं न वर्णयेत् । अतः शौनकसम्प्रश्नश्चारित्रत्वं च बुध्यते ।।७।।

## तृतियस्कन्धे षड्विंशोऽध्यायः ।

आत्मानात्मविवेकाय षड्विंशे साङ्ख्यमुच्यते । तत्त्वानां लक्षणान्यत्र निरुक्तिश्चेयमत्र च ।।१।। जीवब्रह्मविभागार्थं प्रक्रियाद्वितयं स्मृतम् । संसारे मूलभावे च पुरुषः प्रकृतिर्मता ।।२।।

## तृतीयस्कन्धे सप्तविंशोऽध्यायः ।

साङ्ख्येनेतरभिन्नस्य ज्ञाने जाते तथाऽऽत्मनः । ब्रह्मरूपेण तज्ज्ञानं सप्तविंशे निरूप्यतें ।।१।। साधनानि स्वरूपं च चिन्तनार्थमिहोच्यते । युक्तयोऽप्यत्र कथ्यन्ते विपर्ययनिवृत्तये ।।२।।

## तृतीयस्कन्धे अष्टाविंशोऽध्यायः ।

चित्तञ्चेद्भगवत्स्पृष्टं भक्तिज्ञानविरक्तिभिः । तदा शुद्धं स्वसम्बन्धिपुरुषं गमयेत्फलम् ।।१।। योगेनाऽपि भवेच्छुद्धमिति योगो निरूप्यते । अष्टाविंशे ध्यानयुक्तः सर्वसाधनसंयुतः ।।२।। यत्रैव भगवद्वशस्तत्प्राणादिकं भवेत् । स्वतः शुद्धो हरेर्नाऽन्यः स्वाध्याय इव सर्वथा ।।३।।

## तृतीयस्कन्धे एकोनत्रिंशोऽध्यायः ।

एवं ज्ञानप्रकरणं साङ्गं वै सुनिरूपितम् । अतः परं तु वैराग्यं चतुर्भिर्विनिरूप्यते ।।१।। वैराग्ये कारणं कालः परिच्छेदक ईरितः । कालस्य भक्तिहेतुत्वं माहात्म्यार्थं स्वतोऽपि तत् ।।२।। ततो जीवस्य

गतयो लोकशास्त्रविभेदतः । लोकोऽहि द्विविधः प्रोक्तः परलोकस्तथैहिकः ॥३॥ वैदिको ब्रह्मपर्यन्तः कालश्चैवं चतुर्गतिः । यावन्निरूपितं पूर्वं तत्कालास्पृष्टमेव हि ॥४॥ अग्रे सर्वं कालसाध्यमतो वैराग्यहेतुकम् । कालस्तु सर्वत्र समः स्वतन्त्रैः स विरुदद्धयते ॥५॥ दण्डनेतुर्यथा सर्वे हरिणैव तथा यतः । अतः कालवशानां हि वार्ता प्रकरणे तथा ॥६॥ एकोनत्रिंशदध्याये कालभक्तिः ससाधना । माहात्म्यं चापि कालस्य विस्तरेण निरुप्यते ॥७॥ सर्गे यद्यस्यनोत्पत्तिर्वैराग्यं न भवेत्ततः । आधिभौतिकभूतादीन्येतानीत्यपि बोध्यताम् ॥८॥

## तृतियस्कन्धे त्रिंशोऽध्यायः ।

अभीतः कालकार्येषु यो मूढो वर्तते गृहे । नदीप्रवाहे गृहवत् स दुःखीति निगद्यते ।।१।। बहिर्मुखो हि कालस्य विषयो नाऽऽत्मदर्शनः । अतो बहुर्मुखे कालः लोकयोर्दुःखदः स्मृतः ।।२।। त्रिंशत्तमे तथाऽऽध्याये गृहस्थस्योभयोर्महत् । लोकयोरुच्यते दुःख पुनर्जन्मावधि स्फुटम् ।।३।। अष्टादशभिराद्यन्तमरणावधि वर्ण्यते । पुनर्जन्मावधि परं श्लोकैः षोडशभिः पुनः ।।४।।

## तृतीयस्कन्धे एकत्रिंशोऽध्यायः ।

एकत्रिंशे पुनस्तस्य गर्भादिकृतयातनाः । जानतोऽपि पुनर्मोहो दुःख चापि तथोच्यते ।।१।। कृतिः प्रधानं न ज्ञानं यावद्देहस्मृतिर्भवेत् ।

अतस्त्यागो विधातव्यो ज्ञानं तस्मात्तु दुर्बलम् ।।२।। क्रिया चेद्विषमा जाता ज्ञानं तस्य न साधकम् । क्रियां चेज्जनयेत्तद्धि तदुत्तममिहोच्यते ।।३।। अधर्माधिक्यतो धर्म यः करोति गृही सदा । बहुजन्मविपाकेन गर्भे तस्य भवेन्मतिः ।।४।। तामसत्वात्तु धर्मस्य न भूमौ नोत्तरे फलम् । अतो गर्भे ज्ञानसिद्धिस्तादृशस्योच्यते हितम् ।।५।।

### तृतियस्कन्धे द्वात्रिंशोऽध्यायः ।

कालस्य बाधकत्वे हि निषिद्धात् फलमीरितम् । निषिद्धरूपता चोक्ता पुण्यस्य फलमीर्यते ।।१।। त्रिविधस्यापि धर्मस्य द्वात्रिंशे फलमुच्यते । ज्ञानं मुख्यं फलं तस्य ससाधनमिहोच्यते ।।२।। अधोगतिर्मध्यगतिः पूर्वमत्र निरूपिता । उत्तमा मोक्षपर्यन्तं यथा स्तात्तदिहोच्यते ।।३।।

## तृतियस्कन्धे त्रयस्त्रिंशोऽध्यायः ।

एवमष्टभिरध्यायैर्मताष्टकमुदीरितम् । सर्वेषां तु फलं मुक्तिरतः साऽत्र निरूप्यते ।।१।। त्रयस्त्रिंशे तथाऽध्याये स्त्रिया मुक्तिरुदीर्यते । सर्गस्तवधिर्यस्माद्देवास्ते लीलयोद्गताः ।।२।। त्रयस्त्रिंशाद्द्विधा लीला सर्गाख्या देवबान्धवी । वसवश्च तथा रुद्रा एक इन्द्रप्रजापती ।।३।। आदित्याश्च यतः सत्त्वाने चतुर्दशधा मताः । मुक्तिः प्रसादाद्धि भवेन्न शास्त्रैः साधनैरपि ।।४।। प्रसादश्च स्वतः प्रीते न सम्बन्धादिभिः क्वचित् । अतः स्तोत्रं प्रसादश्च मुक्तिश्चापि फलं ततः ।।५।। सर्गत्वख्यापनार्थाय वक्तुः स्थितिरुदीर्यते । भगवत्त्वात्स्थितौ तस्य सर्वः सर्गः प्रतिष्ठितः ।।६।। शास्त्रार्थेऽवगते सम्यक् प्रसादे यत्नवान् भवेत् । अतः प्रसादनार्थाय तस्या यत्न उदीर्यते ।।७।।

## [१]दशमसस्कन्धे प्रथमोध्याय: ।

नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम् । लक्ष्मीसहस्त्रलीलाभि: सेव्यमानं कलानिधिम् ।।१।। चतुर्भिश्च चतुर्भिश्च चतुर्भिश्च त्रिभिस्तथा । षड्भिर्विराजते योऽसौ पञ्चधा हृदये मम ।।२।। दशमार्थ: प्रकरणाध्यायार्थश्च विचार्यते । नवलक्षलक्ष्यो हि कृष्णस्तस्य निरूपणात् ।।३।। आश्रय: क्रमभावित्वान्निरोधो वेति संशय: । लीलानिर्द्धारको ह्यर्थ: क्रममात्रं तु दुर्बलम् ।।४।। यथाकथञ्चिच्छ्रवणं सफलत्वाय कल्पते । निरोध: प्रलयो लोके प्रसिद्ध: प्रकृते न स: ।।५।। प्रतीतो द्वादशेऽन्यत्र महत्त्वाच्छुद्धलीलया । सहितो ह्याश्रय: स्कन्धे प्रतिपाद्य इहेति चेत्

।।६।। नहि सापेक्षरूपस्य प्रथमं सुनिरूपणम् । नवलक्षणसापेक्षो ह्याश्रयो रूप्यते कथम् ।।७।। अग्रे लीलाद्वयकथा फलसिद्धौ वृथा भवेत् । पूर्वोत्तरस्कन्धयोश्च नश्येत् कारणकार्यता । कृष्णस्त्वेकादशेऽप्यस्ति क्रमश्च स्वीकृतो भवेत् ।।८।। निरोधोऽस्यानुशयनं प्रपेश्च क्रीडनं हरेः । शक्तिभिर्दुर्विभाव्याभिः कृष्णस्येति हि लक्षणम् ।।९।। नैमित्तिको निरोधोऽन्यो धर्मग्लानि-निमित्ततः । स चात्र नैव सद्ग्राह्यो हरिणा दुष्टभूभुजाम् ।। आद्यन्तयोरिहाभावान्मुक्तावप्यनुवृत्तितः ।।१०।। लक्षणस्याप्रवेशश्च लीलाधिक्यं तथा भवेत् । तदर्थं जन्मकथनं पृथास्तोत्रविरोधि हि ।।११।। कार्यकारणहानिश्च प्रकान्तत्याग एव च । भक्तत्वाद्भुव

उद्धारो भारहारान्निरूपितः ॥१२॥ प्रकटः परमानन्दो यदा भूमेस्तदैव हि । मर्द्दनक्लेशहानिः स्यादिति तस्याः समुद्यमः ॥१३॥ ब्रह्मरुद्रादिदेवानामत एवान्यसंश्रयः । भक्तानामेव निस्तारः कृतः कृष्णेन संसृतेः । अतो निरोधो भक्तानां प्रपञ्चस्येति निश्चयः ॥१४॥ यावद् बहिः स्थितो वह्निः प्रकटो वा विशेन्न हि । तावदन्तः स्थितोऽप्येष न दारुदहनक्षमः ॥१५॥ एवं सर्वगतो विष्णुः प्रकटश्चेन तद्विशेत् । तावन्न लीयते सर्वमिति कृष्णसमुद्यमः ॥१६॥ रूपान्तरं तु नटवत् स्वीकृत्य त्रिविधान्निजान् । प्रपञ्चाभावकरणादुज्जहारेति निश्चयः ॥१७॥ पञ्चप्रकरणान्यत्र चतुर्भिर्जन्म सत्पतेः । अष्टाविंशतिभिः पूर्व तामसत्वाद् व्रजोद्धृतिः ॥१८॥ तथैव राजसानां च यदुनां च विशेषतः ।

सात्त्विकानेकविंशत्या निष्प्रपञ्चाश्चकार ह ।। भगवानेव नान्योऽत्र तदर्थं षड्भगाभिधाः ।।१९।। चतुर्मूर्तेर्जन्मतोऽत्र तथाध्याया निरूपिताः । तत्तत्प्रकरणे तेषामुपयोगस्तु वक्ष्यते ।।२०।। हेतुद्यमस्वीकरणकापटयैः प्रथमो महान् । प्रद्युम्नश्चानिरुद्धश्च वासुदेवस्तथा परः ।।२१।। हेतुश्च त्रिविधो ह्यत्र गुणा भक्ताहितप्रदाः । कंसादेः कालतोऽज्ञानात् त्रिधा दुःखं तु तद्गतम् ।।२२।। भूमिर्माता तथा चान्ये दुःखभाजो हरिप्रियाः । यथायोग्यं दुखमेषामत्रैवेति निरूप्यते ।।२३।। त्रयं भगवता शक्यं दूरीकर्तुमितीर्यते । प्रश्नोऽप्यत्राधिकः प्रोक्तः स्कन्धद्वितयवर्त्तनः ।।२४।। अनुवादः स्तुतिः प्रश्ने भक्तत्वज्ञापकावुभौ । अन्यथा

ह्यतिगुप्तार्थं श्रीशुको वर्णयेत् कथम् ।।२५।। अज्ञानमन्यथा ज्ञानं कृष्णगं विनिवार्यते । प्राणनत्वं कथायाश्च दयासिद्ध्यै शुकस्य हि । एवं प्रश्नो द्वादशभिः समतो गुणदोषगः ।।२६।।

## दशमस्कन्धे द्वितीयोऽध्यायः

एवं हेतुं निरूप्याथ कृष्णोद्यम उदीर्यते । महत्त्वज्ञापनार्थाय द्वितीये सविशेषणः ।।१।। दुःखं हेतुरिहागन्तुमिति बोधाय तत्कथा । पुनर्निरूप्यते स्पष्टा शीघ्रागमनहेतुका ।।२।। सर्वेषां ज्ञापनार्थाय कंसवाक्यं तथा स्तुतिः । अन्यथा भगवानेव प्रादुर्भूतः कथं भवेत् ।।३।।

## दशमस्कन्धे तृतीयोऽध्यायः ।

जननं वर्णनं स्तोत्रे सान्त्वनं गमनं तथा । षड्विधो भगवानत्र तृतिये विनिरूप्यते ।।१।। रूपान्तरस्वीकरणमध्यायार्थ इहोदितः । प्रतीयमानो भगवानिति षड्विध उच्यते ।।२।। अष्टभिश्च चतुर्भिर्वै दशभिश्चाष्टभिस्तथा । चतुर्दशभिरष्टाभिः षडर्थाः क्रमतोऽत्र हि ।।३।। ऐश्वर्यमष्टद्या यस्मादर्धमात्राहरौ परा । सार्धाष्टभिरतः प्रोक्तमैश्वर्य सर्वमङ्गलम् ।।४।। अधिकारिणि काले वै अनन्ता भगवद्गुणाः । खण्डशस्तेऽवयवशः सर्वेषां फलबोधकाः ।।५।। मूले समागते कालः स्वकीयान् सकालन् गुणान् । हरौ प्रदशनार्थाय प्रकटीकृतवान् यथा ।।६।। देशोऽपि त्रिविधश्चैव भूतान्यपि तथैव

च । तत्रत्या ये विदुस्तेऽपि ज्ञापनार्थं गुणान् स्वकान् । प्रकटीकृतवन्तो वै दोषनाशपुरःसरम् ।।७।।

दशमस्कन्धे चतुर्थोऽध्यायः ।

मायायाः कार्यमधुना चतुर्थे विनिरूप्यते । अन्यथा भगवत्कार्यं न भवेदनिमित्ततः ।।१।। ज्ञापने दुःखसुखदे ततोऽपि ज्ञापने तथा । कंसस्य सहभृत्यस्य धर्मबाधो न चान्यथा ।।२।। तामसप्रभुके राज्ये कृतो धर्मस्तु तद्गतः । अतः पूर्वस्य नाशो वै कर्तव्यं तामसाश्च ते ।।३।। ब्राह्मणा अपि तद्देशे स्वभावात् तामसा मताः । कालस्तथाविधो यस्मात् पश्चाज्जातस्तु सात्त्विकः ।।४।।

## [1]दशमसस्कन्धे पञ्चमोध्यायः ।

एवं चतुर्भिरध्यायैर्जन्म विष्णोर्निरूपितम् । हेतूद्यमोत्तराङ्गैश्च राजसादिगुणैर्युतम् ।।१।। सप्तसप्ततिभिः कृत्यं हरेरत्र निरूप्यते । भगवान स्वेन धर्मैश्च सप्तधैकादशेन्द्रियैः ।।२।। कृत्यं चकार यस्माद्धि ततस्तावद्भिरुच्यते । त्रिविधानि च कर्माणि त्रिविधानां हिताय हि ।।३।। तत्त्वातिक्रमणे रोधस्तामसे राजसे भवेत् । कालातिक्रमणे शिष्टे कालस्तत्रैकविंशतिः ।।४।। लौकिकेषु तु धर्मेषु यत्रैव हरिवेशनम् । निवर्तते तदेवात्र वह्वेर्दारुमयं तथा ।।५।। स्वभावास्यन्यथाभावो न वै शक्यः कथञ्चन । अतस्त्रिविधजीवेषु त्रिविधा भगवत्कृतिः ।।६।। लौकिकं तामसे मुख्यं कामान्ता च

कृतिः स्फुटा । कामोद्भूते तथा प्रीतिस्तेनादौ तन्निरूप्यते ॥७॥ बाललीला मध्यलीला प्रौढलीला तथैव च । कामलीलेति लोके वै चतस्त्रः सुखदाः स्मृताः ॥८॥ एकं भगवतः कार्यं बह्वर्थानां च साधकम् । प्रपञ्चविस्मृतिः सर्वा तदासक्तिश्च वर्ण्यते ॥९॥ येनैव त्रिविधा भक्ता न स्मरन्ति जगत् क्वचित् । कृष्णे च सन्नतात्मानस्तत् कार्यं भगवत्कृतम् ॥१०॥ बाललीला सप्तविधा प्रथमं सा निरूप्यते । बालभावरता ये हि तेषां रोधस्ततो भवेत् ॥११॥ उत्सवाविष्टचित्ता ये येऽप्याश्चर्याभिवेशिनः । अलौकिकरता ये च ये चोपद्रवणोत्सुकाः ॥१२॥ स्त्रीस्वभावरता ये वै ये व तत्त्वे च लौकिके । सर्वोद्योगपरा ये च तेषां रोधो निरूप्यते ॥१३॥ जन्मोत्सवो हरेरत्र पञ्चमे विनिरूप्यते । आवश्यकं परित्यज्य कृतं

तदिति चोच्यते ।।१४।। अन्यथाज्ञानशङ्का च तेनैव विनिवार्यते । उत्सवस्त्वन्यथा न स्याद् द्रव्यानयनमेव च । आसक्तिबोधनार्थाय तस्यान्ते भयवर्णनम् ।।१५।।

## दशमस्कन्धे षष्ठोऽध्यायः ।

चरित्रमद्भूतं शास्त्रे लोकेऽपि भगवत्कृतम् । पूतनासुपयःपानं षष्ठे रक्षा निरूप्यते ।।१।। एकं कार्यं भगवतो बह्वर्थानां तु साधकम् । अतो दुष्टवधो रक्षा बालकानां ततः कृता ।।२।। वीर्यं भगवतो वर्ण्यं मायया भगवत्कृतम् । दुःख तस्मात् तु मुक्तिर्हि निरोधोक्तेर्न दूषणम् ।।३।। भयं निवर्त्य वीर्येण द्विविधं बाह्यमान्तरम् । आन्तरं शब्दजं बाह्यं पूतनाजनितं तथा ।।४।।

## दशमस्कन्धे सप्तमोध्यायः ।

पूतनासुपयःपानं भगवत्त्वाय यत् कृतम् । अलौकिकत्वज्ञानाय तत् षष्ठे विनिरूपितम् ॥१॥ ततोऽप्यलौकिकं लोके विशेषासक्तिबोधकम् । सप्तमे त्रिविधं प्राह शकटोत्पाटनादिकम् ॥२॥ उत्क्षेपणमवक्षेपः प्रसारणमितीर्यते । राजसानां तामसानां सात्त्विकानां च संग्रहे ॥३॥ सुप्तं चित्तमथोल्लास्य त्याजयित्वा च लौकिकान् । स्वासक्तिसिद्धये प्रीत्या दुःखं च कृतवान् क्वचित् ॥४॥ यशो हि सर्वगं चेत् स्यात् स्वासक्त्यैव च तद् भवेत् । यशोदानन्दयोरत्र निःप्रपञ्चो विधीयते ॥५॥ आनुषङ्गिकमन्येषां गोपानां सर्वदेहिनाम् । गोपीनामिति तत्राद्ये यशोदाया वितन्यते ॥६॥

## दशमस्कन्धे अष्टमोऽध्यायः ।

येनैव तु चरित्रेण सत्त्वं शुद्ध्यति सर्वथा । सर्वस्य मूलं यद्यस्मात् तदष्टम उदीर्यते ।।१।। नामान्यग्रे शोधकानि ततो रूपाण्यनेकशः । ज्ञानं भक्तिश्च भाग्यं च पञ्चार्थाः सर्वशोधकाः ।।२।। संस्कृतान्येव नामानि शोधकानीति संस्कृतिः । स्वेच्छालीलाविशिष्टं हि रूपमानन्दभावतः ।।३।। अन्येच्छया कृतान्यत्र चरित्राणि ततोऽन्यथा । ज्ञानं प्रत्यक्षतो दृष्टं महात्म्यज्ञानपूर्वकम् ।।४।। स्नेहश्चालौकिके तद्वद् हेतुश्च महतां कृपा । पूर्वस्मिन् हृदये सिद्धे स्वत एवाग्रिमं भवेत् । तत्राङ्गं द्वितयं प्रोक्तं गुरुर्दुःसङ्गवर्जनम् ।।५।।

## दशमस्कन्धे नवमोऽध्यायः ।

शास्त्रर्थतो यथा भक्तिर्हरौ भवति निश्चला । तदर्थं नवमे प्राह चरित्रं परमाद्भुतम् ।।१।। स्वरूपं च कृपालुत्वं हरेर्ज्ञातव्यमञ्जसा । अतो दयासुसंमिश्रं ज्ञानमत्र निरूप्यते ।।२।। निरोधो यदि भक्तानां स्वस्मिन् स्वस्य च तेषु च । तदोभयसुसम्बन्धाद् दृढो भवति नान्यथा ।।३।। ज्ञानवैराग्यरूपैर्हि स्वाधीनो भगवान भवेत् । अतोऽध्यायत्रये लीला जीवधीना निरुप्यते ।।४।। अतिपौरुषमेतद्धि जीवानामिति निश्चितम् । द्वादशाङ्गमतिक्रम्य षड्मिर्वश्यो भवेद् गुणैः ।।५।। पञ्चपर्वामविद्यां हि लोकानामपि नाशयेत् । अतः पञ्चभिरुक्तो हि विचारो भगवद्गतः ।।६।।

## दशमस्कन्धे दशमोऽध्यायः ।

एवं तु नवमाध्याये भक्तिरुक्तातिदुर्लभा । कृष्णसेवकसख्यस्य हेतुर्दशम उच्यते ॥१॥ वैराग्यं भगवद्धर्मः षड्गुणोऽत्र निरूप्यते । गुणानां भगवत्त्वाय स एव हि यतो भवेत् ॥२॥ वैराग्यमनिवर्त्यं तु भगवद्वाक्यतो भवेत् । विशेषतस्तु यद्वाक्यं न निवर्तेत केनचित् ॥३॥ तादृशं शापरूपं स्याद् भक्तानामेव तादृशम् । अतो वैराग्यकथने शापो मोक्षावधिर्मतः ॥४॥ शापोद्यमस्तथा हेतुः शापश्चापि प्रसादभाक् । वाक्यस्यापि फलं शीघ्रं स्तुतिश्चानुग्रहस्तथा ॥५॥ षड्भिर्द्वादशभिश्चैव त्रिभिः षड्भिस्तथैव च । दशभिः पञ्चभिश्चेति षडर्थां क्रमतो मताः ॥६॥ अपूर्वत्वाच्छ्रोतुमिच्छा तेन प्रश्नः परीक्षितः । स्वस्यापि तादृशत्वेन तद्वन्मोक्षाशया पुनः ॥७॥

## दशमस्कन्धे एकादशोऽध्यायः ।

निरोधः सर्वभावेन वर्णनीयो हि गोकुले । स्त्रीणां स चोक्तः पुंसां च नन्दप्राधान्यभावतः ॥१॥ एकादशे ततोऽध्याये पूर्वावस्थामशेषतः । त्याजयित्वा तु नन्दस्य कृष्णभावो निरूप्यते ॥२॥ मोचनं मुग्धलीला च स्थानान्तरपरिग्रहः । तत्र लीला वत्सबकौ ज्ञानं चेति निरूप्यते ॥३॥ षड्भिस्त्रिभिः षोडशभिश्चतुर्भिः षड्भिरेव च । नवभिः पञ्चभिश्चेति सप्तार्थाः सगुणा हरिः ॥४॥ स्वार्थं तु भगवान् कार्यस्तथात्वं ज्ञाप्यते पुनः । सर्वस्वं हरिरेवेति तदर्थं त्याग ईर्यते ॥५॥ वृन्दावने स्थितौ हेतुर्भगवत्तोषतः परम् । नास्तीति ज्ञापनायोक्ता प्रीतिर्लीलोपयोगिषु ॥६॥ वत्सचारणदोषस्य निवृत्तिर्वत्समारणम्। गोपालदोषव्यावृत्यै बकस्यापि विनाशनम्

।।७।। स्थानत्यागे हरीच्छैव कारणं न तु दुष्टता । तज् ज्ञापयितुमत्रापि बकवत्सौ विनाशितौ ।।८।। अतो विमर्शो गोपानामनन्दश्च निरूपितः । तदर्थमेव च हरेर्बालभावो न चान्यथा ।।९।। सम्पन्ने तु ततस्तस्य परित्यागोपि वर्ण्यते ।।९१/२।।

[1]दशमसस्कन्धे द्वादशोध्यायः ।

यशोदानन्दयोरेवं निरोधः सुनिरूपितः । गोपालानां निरोधोत्र सस्त्राकाणां निरूप्यते ।।१।। मध्यमोयं समस्तानां निरोधः परिकीर्त्यते । पञ्चधैवानुभावोत्र दुष्टनिग्रहरूपवान् ।।२।। आध्यात्मिकीमविद्यां वै दूरीकर्तुं तथाकृतिः । तदर्थं क्रमतोध्याया उभयेषां तथा द्वयम् ।।३।। स्नेहाधिक्यसुसिद्ध्यर्थ स्नेहान्तो मध्यमः

स्मृतः । प्रथमं द्वादशोऽध्याये देहाध्यासो हि धेनुकः ।।४।। तद्वधो ज्ञानपूर्वो हि फलावधि निरूप्यते । कालीय इन्दियाण्याहुर्विषयास्तद्विषं मतम् ।।५।। ततः सर्वविनाशः स्यादित्यन्ते मरणाभिधा । ततश्चेज् जीविताः सर्वे पुनर्देहान्तरस्थितिः ।।६।।

दशमस्कन्धे त्रयोदशोऽध्यायः ।

इन्द्रियाणि समस्तानां मृत्यवः समुदाहृताः । त एव विषपूर्णानि कालीयस्य शिरांसि हि ।।१।। अतस्तदुमर्दोत्र निरूप्यो हि त्रयोदशे । सन्तुष्टो भगवांस्तेषुस्वलीलां चेत् करोति हि ।।२।। भक्तिमार्गानुसारेण निस्तारो नान्यथा भवेत् । तेषां प्रपञ्चः

कामिन्यस्ताश्चेत् कृष्णस्य सर्वथा ।।३।। ततोऽञ्जसैवेद्रियाणि भवन्त्याज्ञावशे हरेः । तदैव विषयश्चापि हरेर्भवति सर्वथा ।।४।। सर्वोपयोगरहितः पूर्वसम्बन्धहानतः । परीक्ष्यैवेन्द्रियाणां हि निग्रहं कुरुते हरिः ।।५।। परीक्षार्थं ततो देवः कालं प्रेरितवांस्तथा । स्वासक्तिश्चापि कर्तव्या निरोधे मध्यमे महान् ।।६।। यत्नः कर्तव्य इत्येव मुग्धभावं चकार ह । कथामात्रत्वाभावाय सङ्क्षेपेणाह तां पुरा ।।७।। अक्लिष्टकर्मा भगवान् ज्ञापयामास लीलया । उद्यमश्चापराधश्च परीक्षाकार्यमेव च ।।८।। स्तुतिः प्रसाद इत्यत्र षडर्थाः परिकीर्तिताः ।।८१/२।।

## दशमस्कन्धे चतुर्दशोऽध्यायः ।

चतुर्दशे भगवतो दर्शनान्निवृतो व्रजः । अग्नेः संरक्षितः पश्चात् प्रासङ्गिकमिहोच्यते ॥१॥ इन्द्रियप्राणयोर्दोषो निवार्यस्तु सहैव हि । अतः कालीयकथया दाहाभावो निरूप्यते ॥२॥ प्रासङ्गिककथा त्वत्र हरेरद्भुतकर्मताम् । वक्तुं युक्ता सर्वदोषा नान्यथा यान्ति हीती च ॥३॥

## दशमस्कन्धे पञ्चदशोऽध्यायः ।

उक्तः पञ्चदशेध्याये प्रलम्बस्य बघो महान् । आवेशिचरितं वाच्यं बलभद्रकृतं ततः ॥१॥ व्रजे गतस्य क्रीडा च सर्वथा वनगोष्ठयोः । अन्तःकरणदोषश्च महानत्र निवर्त्यते ॥२॥

## दशमस्कन्धे षोडदशोऽध्यायः ।

अज्ञानात्मा ह्यात्मदोषो दवाग्निस्तन्निवारणम् । षोडषे प्रोच्यते सम्यङ् निरोधः सेत्स्यते ततः ।।१।। ततो दासैर्मुदा लीलास्वच्छन्दाग्रे भविष्यति । स्त्रीणां चैव मनःप्रीतिस्तदासक्तिः फलिष्यति ।।२।।

## दशमस्कन्धे सप्तदशोऽध्यायः

लीला सप्तदशेध्याये निरुद्धैः सहितोच्यते । वर्षाशरत्कालयोगात् सर्वतत्त्वं निरूप्यते ।।१।। दोषापगमन एव सर्वतत्त्वस्य बोधनम् । ज्ञाते च तत्त्वे सक्रीडा प्राजापत्ये निरूप्यते ।।२।। माहात्म्यज्ञानपूर्वस्तु स्नेहः कृष्णे हि युज्यते। तादृशैश्च मुदा क्रीडा यश्चाप्यत्र निरूप्यते ।।३।।

## दशमस्कन्धे अष्टदशोऽध्यायः ।

अष्टादशे गोपिकानामासक्तिर्वर्ण्यते स्फुटा । वर्ण्यवर्णकभेदेन गोपानामपि सोच्यते ।।१।। प्रवेशबोधने तासामुद्बोधाय निरूप्यते । तद्गुणेषु प्रसक्ता हि तदासक्ता भवन्ति हि ।।२।। आसक्तिः प्रेमपूर्वैव प्रेमापि हरिणा कृतम् । उद्बोधकं च हरिणा कृतं नान्येन केनचित् ।।३।। आसक्त्या वर्णनं तस्माद् विद्यान्ते वर्ण्यन्ते स्फुटम् । कालाधिको हरिश्चात्र पुरुषोत्तम एव च ।।४।। त्रयोदशविधा लीला तत उक्ता पृथक् पृथक् ।।४१/२।।

## [1]दशमसस्कन्धे एकोनविंशोऽध्यायः ।

अतः सप्तभिरध्यायैर्निरोधोऽत्र निरूप्यते । उत्तमः फलपर्यन्तो विद्यानिर्णयपूर्वक ।।१।। विद्यापञ्चकमत्रापि तस्मिञ् जाते

सुरेक्षणम्। इहैव गमनं चापि वैकुण्ठावधि वर्ण्यते ।।२।। ज्ञानं कर्म च विद्यायां पञ्चात्मकमिति स्थितिः । अविद्याकार्यसम्बन्धो नात्रेति विनिरूप्यते ।।३।। स्त्रीपुंसोः सहभावेन तुल्यत्वाश्च निरूपणम् । लोकानुसारिणी विद्या कर्मज्ञानात्मिका पुरा ।।४।। निरुप्यते गोपिकानां गोपानां च विभेदतः । एकोनविंशे भोग्यानां कुमारीणां व्रतं यथा ।।५।। अन्तस्थानां कुमाराणां तथा ज्ञानमिहोच्यते ।।५१/२।।

दशमस्कन्धे विंशोऽध्यायः ।

कर्मज्ञाने वैदिके तु विंशत्यध्याय उक्तवान् । उभयोर्निर्णयो यादृक् सोप्यत्र विनिरूप्यते ।।१।। साक्षाद्भगवतोक्तं हि यथापूर्व न भासते । परंपरोक्तमप्येवं स्त्रिया भावस्तथापरः ।।२।।

## दशमस्कन्धे एकविंशोऽध्यायः ।

एकविंशे हैतुकस्य कर्मणो विनिवारणम् । कृत्वा तद् वैदिकं चक्रे युक्त्यैवेति निरूप्यते ॥१॥ यथा प्रबोधिता विप्रा एवं अपि स्वयम् । महतां महती शिक्षा उत्तरोत्तरमुत्तमा ॥२॥ स्त्रीणां वस्त्राणि जगृहे विप्राणां तु स्त्रियः सतीः । देवानां तु हवींष्येव येषु ते सुप्रतिष्ठिता ॥३॥ तामसान् राजसांश्चैव समुद्धृत्य मनीषया । सात्त्विकोद्धरणेयं तु यागभङ्गं चकार ह ॥४॥

## दशमस्कन्धे द्वाविंशोऽध्यायः ।

हेतुशास्त्रमिदं यस्माद् दृष्टार्थमुपयज्यते । अदृष्टार्थं तथा चान्यत् तज् ज्ञापयति निश्चितम् ॥१॥ हैतुके फलभोक्तायमिन्द्रो विघ्नं चकार ह । वृष्टिरूपं ततः कृष्णः शैलधारी बभूव ह ॥२॥

उभयोर्हैतुकत्वार्थमेवं भगवता कृतम् । निषिद्धभोगिनो बुद्धिर्नष्टा भवति सर्वथा ।।३।। इतीन्द्रस्य महामोहवाक्यान्याह विशेषतः । द्वाविशं ईर्यते कृष्ण इन्द्रेण विनिपीडितम् ।।४।। व्रजं गोवर्धन धृत्वा सम्यक् पालितवानिति ।।४१/२।।

## दशमस्कन्धे त्रयोविंशोऽध्यायः ।

अज्ञानमन्यथाज्ञानं कृष्णगं विनिवार्यते । त्रयोविंशे समत्वाय निरूद्धानामशेषतः ।।१।। पूर्वपक्षश्च सिद्धान्तः फलं चेति निरूप्यते । अप्राकृतत्वं सम्बन्धो द्वयं स्थाप्यमिहोक्तिभिः ।।२।। विरोधात् प्राकृतत्वेन सम्बन्धस्त्यज्यते पुरा । जामतस्तादृश एवात्र न सन्देहस्तथापरः ।।३।। माहात्म्यदर्शनं हेतुः पूर्वपक्षे तथापरे । गर्गवाक्यानि तज्ज्ञानं फलमित्येष निश्चयः ।।४।।

## दशमस्कन्धे चतुर्विंशोऽध्यायः ।

चतुर्विंशे भगवतो अभिषेतो निरूप्यते । स्तुतिः शिक्षा तथेन्द्रस्य कामधेन्वादिभिः कृता ।।१।। यथा रक्षा सुसंसिद्धा मदाभावस्तथा यदि । तदैव भगवत्कार्यं सर्वं सफलतां व्रजेत ।।२।। गोरक्षा चेद्दूरिकृता नाधिदैविकगामिनी । तया वा दासभावश्चेत् न चाप्यङ्गीकृतः क्वचित् ।।३।। स्वयं वा स्वामिभावेन न स्वीकुर्यान् मुरद्विषम् । तदेयं भगवल्लीला प्रमाणं नैव जायते।।४।। अतो हेतूक्तिरप्येषा सत्फला वर्ण्यते स्फुटा । इन्द्रयागश्च भविता यस्मादिन्द्रो हरिः स्वयम् ।।५।।

## दशमस्कंधे पञ्चविंशोऽध्यायः ।

पञ्चविंशे तु वरुणान् नन्दं मोचयिता हरिः । ततः सर्वान् स्ववैकुण्ठे नेष्यतीत्युच्यते फलम् ।।१।। अभिषेकश्च तैर्दृष्टो देवस्तोत्रादिकं श्रुतम् । ज्ञाते देवोत्तमत्वे तु द्रष्टव्यं पौरुषं परम् ।।२।। अन्यथा नन्दविज्ञानं भवेत् पर्यवसायि तत् । अतस्तन्निग्रहो वाच्यो वरुणस्तेन सेवकः ।।३।। कालाद्युपासकश्चेत् स्याद् भगवत्सेवकः क्वचित् । ततः क्लेशवाप्नोति कृष्णादेव च मुच्यते ।।४।। ततो माहात्म्यविज्ञानं पूर्ण तस्य भविष्यति । ततश्चिन्तनमात्रेण भगवान् स्वपदं नयेत् ।।५।।

## [1]दशमसस्कन्धे षड्विंशोऽध्यायः ।

ब्रह्मानन्दात् समुद्धृत्य भजनानन्दयोजने । लीला या युज्यते सम्यक् सा तुर्ये विनिरूप्यते ।।१।। लौकिकस्त्रीषु संसिद्धस्तद्द्वारा पुरुषे भवेत् । स्वानन्दानुभवार्थं

हि योग्यतापि निरूपिता ।।२।। ततो हि भजनानन्दः स्त्रीषु सम्यग् विधार्यते । तद्द्वारा पुरुषाणां च भविष्यति न चान्यथा ।।३।। स्त्रिय एव हि तं पातुं शक्तास्तासु ततः पुमान् । अतो हि भगवान् कृष्णः स्त्रीषु रेमे ह्यहर्निशम् ।।४।। बाह्याभ्यन्तरभेदेन आन्तरं तु परं फलम् । ततः शब्दात्मिका लीला निर्दुष्टा सा निरूप्यते ।।५।। ततो रूपप्रश्नस्य पञ्चधा रमणं मतम् । आत्मना प्रथमा लीला मनसा तु ततः परा ।।६।। वाक्प्राणैस्तु तृतिया स्यादिन्द्रियैस्तु ततः परा । शारीरी पञ्चमी वाच्या ततो रूपं प्रतिष्ठितम् ।।७।। षड्विंशे तु हरिः पूर्वे जीवानानन्दयत् स्वयम् । ते चेत् समर्पितात्मानस्तत्रोपायश्च रूप्यते ।।८।। आत्मा यावत् प्रपञ्चोऽभूततावद् वै रमते हरिः । सोऽन्तःकरणसम्बन्धी तिरोधत्ते हरिश्च सः ।।९।।१।। जीवेऽन्तःकरणे चैव प्राणेष्विन्द्रियदेहयोः । विषेयेषु गृहेऽर्थे च पुत्रादिषु हरिर्यतः ।।९।। तादृशीं भावनां कुर्यात कामक्रोधादिभिर्यथा

। पूर्वप्रपञ्चविलयो यथा ज्ञाने तथा ततः ।।२।।१६।। तमोरजःसत्त्वभेदाः खान्तपर्यवसानतः । निरुप्यन्ते स्त्रियस्तासु वाक्यन्यपि यथायथम् ।।१।।१८।। वाक्यानां बाधवाक्यानि तावन्ति प्रार्थनाधिका । एकादशविधास्तेन तासां वाचो जयन्ति हि ।।१।।३१।। षड्गुणैश्वर्यभावेन षोढा रेमे हरिः स्वयम् । स्वरूपेणापि श्रृङ्गारो द्विविधोऽपि निरूपितः ।।१।। सामान्यरमणं पूर्वं विशेषे मेलनं पुरा । बाह्येन रमणं पश्चादान्तरं च ततः परम् ।।२।। ततो नानाविलासेन जातकेलिविभेदतः । विप्रलम्भस्य सिद्ध्यर्थं तासां मानमुदीर्यते ।।३।। तिरोभावस्ततश्चापि नायं लौकिककामुकः । क्रिया सर्वापि सैवात्र परं कामो न विद्यते ।।४।। तासां कामस्य सम्पूर्तिर्निष्कामेनेति तास्तथा । कामेन पूरितः कामः संसारं जनयेत् स्फुटः ।। कामाभावेन पूर्णस्तु निष्कामः स्यान् न संशयः ।।५।। अतो न कापि मर्यादा भग्ना मोक्षफलापि च । अत एतच्छ्रुतौ लोको

निष्कामः सर्वथा भवेत् ॥६॥ भगवच्चरितं सर्वे यतो निष्काममीर्यते । अतः कामस्य नोद्बोधस्ततः शुकवचः स्फुटम् ॥७॥४२॥

दशमस्कन्धे सप्तविंशोऽध्यायः ।

स्वानन्दस्थापनार्थाय लीला भगवता कृता । स बाह्यो जनितः पुष्टो यथान्तर्निविशेत् पुनः ॥१॥ तदर्थं भगवांस्तासु लीलया सहितोऽविशत् । चत्वारोऽत्र निरूप्यार्थाः रसासक्तिर्हरेः क्रियाः ॥२॥ गर्वाभावश्चतत्रादौ निरूप्यन्ते क्रमात् त्रयः । उद्देशतो लक्षणतः फलतश्च यथायथम् ॥३॥ सप्तविंशे तिरोधानाल्लीलान्वेषणतत्पराः रसमन्तर्गतं चक्रुर्गोपिका इति रूप्यते ॥४॥१॥ शब्दो हि धूमवल्लोके बाह्याभ्यन्तरयोगतः । विराजते विनिर्गच्छन् तारतम्यं च गच्छति । अतोऽत्र

धर्मिधर्माणामाधिक्याज्ज्ञानमुत्तमम् ।।१।। यथा भगवतो गानात् स्वयमागत्यसङ्गताः । एवं स्वयं भगवत आगत्यार्थ जगु स्फुटम् ।।२।। कुत्रिमत्वात् तु भावस्य मिलिताश्च स्वतोऽन्यतः । ततो विशेषविज्ञानात् तिरोभावोऽस्फुरत् स्फुटः ।।३।। भक्त्यातिमत्तास्तद्भावमीषन्मत्तास्तु रोषतः । द्वेषभावं समाश्रित्य क्रीडन्त्यो जातमत्सराः ।।१।। सत्वादिगुणभावेन नव लीलाः प्रपेदिरे । अतो न्यूनभावोऽत्र ह्याविष्टाः शकटादिभिः ।।२।। सर्वत्र हरिबुद्ध्या वा पादस्पर्शेच्छया पुनः । उलूखलादिभावोऽपि तत्सम्बन्धप्रसिद्धये ।।३।।१५।। दोषोऽभिमानवचनं वचनोत्तरमेव च । पूर्ववच्च तिरोभावो विज्ञेयं दोषदर्शने ।।१।। स्वयं त्वयुक्तकरणात् प्रकृत्याद्यधिकारिणः । बुद्धिं स्म नाशयामासुः

साप्यन्येवाभवत् ततः ।।२।।८।। श्रीकृष्णगोपिकास्तत्र द्विविधा नवधा गुणैः । समुदायेन भिन्ना वा गतगर्वा असाधनाः ।।९।। हरेर्गानं प्रियं मत्वा जीवनार्थमपि प्रियाः । स्वसन्देहात् तु मिलिता जगुर्नानाविधैर्गुणः ।।२।।४४।।

दशमस्कन्धे–अष्टाविंशोध्यायः ।

अष्टाविंशे हरिर्गानं स्वभावादपराधतः । कृतावज्ञा गोपिका हि स्तोत्रं चक्रुरितीर्यते ।।१।। एकोनविंशतिविधा गोप्यः स्वस्याधिकारतः । एकोनविंशतिविधां स्तुतिं चक्रुर्हरेः प्रियाम् ।।२।। राजसी तामसी चैव सात्त्विकी निर्गुणा तथा । एवं चतुर्विधा गोप्यः पतिमत्यो निरूपिताः ।।३।। तथैवानन्यपूर्वाश्च प्रार्थनामाहुरूत्तमाम् ।

गुणातीताः सात्त्विकीश्च तामसी राजसीस्तथा ।।४।। कृष्णभावनया सिद्धा विशेषेणाह ताः शुकः । अनन्यपूर्विका एव पुनस्तिस्त्रो मुदा जगुः ।।५।। सात्त्विकी तामसी चैव राजसी चेति विश्रुताः । सपूर्वाश्च ततस्तिस्त्रः तामसी राजसी परा ।।६।। पुनस्ता एव त्रिविधा 'अटती' त्यादिभिःस्त्रिभिः । राजसी तामसी चैव सात्त्विकीति विभेदतः ।।७।।अनन्यपूर्वा द्विविधा राजसी सात्त्विकी तथा । तमसा तामसी तत्र नास्तीत्येकोनविंशतिः ।।८।। अथवा प्रार्थनाद्यायाः सप्तान्ते द्विविधा पुनः । चतुर्थ्यस्तु समास्तत्र तत एकोनविंशतिः ।।९।। तत्तद्वाक्यानुसारेण तासां भावो निरूप्यते । अन्यथानेकता स्तोत्रप्रकारैर्नोपयुज्यते ।।१०।।१।। अन्तः स्थितो रसः पुष्टो बहिश्चेन्न विनिर्गतः । तदा पूर्णो नैव भवेदिति वाग्निर्गमस्तथा

।।१।।२।। हस्तेन च स्वरूपेण पदा चोपकृतिर्मता । मुखेन चोपकारा हि कर्तव्य इति ता जगुः ।।१।। पूर्वोक्तमपि सर्वं हि यावत् स्पष्टं न भाषते । तावत् सरसतां याति न कदाचिदितिस्थितिः ।।२।।८।। वाक्यं हास्यमुखश्चैव कामानन्दाधिकारिणः ।।१।।१७।

## दशमस्कन्धे–एकोनत्रिंशोऽध्यायः ।

एकोनत्रिंशकेऽध्याये प्रसादं भगवत्कृतम् । रोदनात् प्राप्य तुष्टास्ता निर्णयज्ञा इतीर्यते ।।१।। नहि साधनसम्पत्त्या हरिस्तुष्यति कास्यचित् । भक्तानां दैन्यमेवैकं

हरितोषणसाधनम् ।।२।। संतुष्टः सर्वदुःखानि नाशयत्येव सर्वतः अतो निर्णयवाक्यानि भजनार्थं न्यरूपयत् ।।३।।१।।

## दशमस्कन्धे–त्रिंशोऽध्यायः ।

त्रिशंत्तमे हरिः प्रीतो लीलां कामकृतामपि । इन्द्रादिदुर्लभां चक्रे स्वानन्दार्थमितीर्यते ।।१।। अस्याः सर्वोपकाराय फलश्रुतिरुदीर्यते । लौकिक्यपि यदा दृष्टिस्तदा सिद्धान्त ईयते ।।२।। रसात्मकस्तु यः कामः सोऽत्यन्तं गूढ एव हि । अतः शास्त्रं प्रवृत्तं हि तृतियं भारतं तथा ।।३।। अतोऽत्र भगवांश्चक्रे नृत्यं कारितवांस्तथा । सर्वाङ्गेषु तु यो लीनः स यथा व्यक्ततां व्रजेत् ।।४।। जलं वायुश्च सामग्री

श्रमाच्छीताश्च जायते । अत्रैव लोके प्रकटमाधिदैविकमुत्तमम् ।।
कामाख्यं सुखमुत्कृष्टं कृष्णो भुङ्क्ते न चापरः ।।५।।

दशमस्कन्धे–एकत्रिंशोऽध्यायः ।

एवं रूपप्रश्नस्य पञ्चधा रसवर्णनम् । निरूप्य नामलीलातो रसार्थमिदमुच्यते ।।१।। एवमुद्धृतभक्तास्तु यद्यन्यं समुपासते । दुःखभाजो भवन्त्येव मुच्यन्ते हरिणैव तु ।।२।। एकत्रिंशे सर्वभावान्निवृत्तानां तु पूर्ववत् । गानेन रमणं चक्रे प्रमाणानन्दसिद्धये ।।३।। बलभद्रेण सहितो वेदरूपेण सर्वथा । तद्दोषं नाशयामास हरिरित्युच्यते स्फुटम् ।।४।।

दशमस्कन्धे–द्वात्रिंशोऽध्यायः ।

द्वात्रिंशेऽन्तर्गोपिकानां स्वानन्दं भगवान हरिः । पूरयामास येनैव पूर्णानन्द इतीर्यते ।।१।। अन्तः प्रविष्टो भगवान् मुखादुद्धृत्य कर्णयोः। पुनर्निवेश्यते सम्यक तदा भवति सुस्थिरः ।।२।। शब्दार्थयोर्मुख्यतात्र युग्माः श्लोकास्ततोऽत्र हि । सर्वेषु चैव मासेषु यत् करोत्युच्यते हि तत् ।।३।। अतोत्र मासयुग्मा हि प्रक्रमः फलमेव च । आद्यन्ते चापरं युग्मं त्रयोदश भवन्ति तत् ।।४।। सर्वोत्तमा हरेर्लीला वेणुनादपुरःसरा । हेतुः सर्वत्र वाच्येऽर्थे प्रथमेषु निरूप्यते ।।१।। देवस्त्रियस्तथा गावः सरितः पादपा लताः । पक्षिणश्च तथा मेघा ब्रह्माद्या गोपिकास्तथा ।।२।। हरिण्यो देवगन्धर्वा द्विधा च भगवान हरिः । उत्तरेषु निरूप्यन्ते रसज्ञा

वेणुवादने ॥३॥ जानाति भगवानेव जानात्येव हरिः स्वयम् । अतोऽन्ते भगवानुक्तो वारद्वयमनन्यधीः ॥४॥ अनुभावस्तु नादस्य स्त्रीषु पूर्वमुदीर्यते । त्रिविधासु ततः पुंसु ब्रह्मा गोपी तथा मृगी ॥५॥ त्रयोऽत्र त्रिविधाः प्रोक्ताः प्रकीर्णाः सकलाः सुराः । सर्व एवानभिज्ञा हि वस्तुसामर्थ्यसंयुताः ॥६॥ एवं वेणुर्व्दादशधा फलतीति निरूपितः ६१/२ ॥१॥

[१]दशमसस्कन्धे–त्रयस्त्रिंशोऽध्यायः ।

गुणातीतस्वरूपेण तामसत्वाद् व्रजस्थिताः। निरुद्धास्तत्त्वसङ्ख्यातैरध्यायैरिती वर्णितम् ॥१॥ प्रद्युम्नरूपो भगवान् वसुदेवहिताय हि । रजोलीलां तथा चक्रे राजसानां निरोधकृत् ॥२॥ असम्बद्धाः पूर्वमुक्ताः सम्बद्धा राजसाश्च हि ।

उभयेषां निरोधोऽतः सर्वान्ते फलितो भवेत् ।।३।।
तत्त्वसङ्ख्यैरथाध्यायैश्चतुर्धा पूर्ववद्धरिः । गुणौ स्वरूपतो लीलां
क्रमादेव तथाकरोत् ।।४।। बन्धूनां तु सुखं दत्त्वा वंशवृद्धिं चकार
ह । एतावता निरुद्धास्ते खण्डद्वयमतोत्र हि ।।५।। उद्यमो मानतां
यातः सप्तमिः स निरूपितः । सप्तमिः सुखदानं च विवाहश्चापि
सप्तमिः ।।६।। त्रिविधोन्ये फलांशे हि प्रविशन्ति यथा सुताः ।
उषाहरणपर्यन्तमिदं प्रकरणं मतम् ।।७।। न कालनियमोऽन्यत्र
सात्त्विके नापि च क्रमः । क्रमः पूर्वत्र संसिद्धः सात्त्विका विरला
यतः ।।८।। नारदो द्विविधो ह्यत्र प्रमाणे विनिरूप्यते ।
कर्मज्ञानविभेदेन ह्यक्रूरो भक्तिबोधकः ।।९।। प्रेमार्थबोधिका गोप्यो

भगवद्बोधकश्च सः । कार्यं च ज्ञापयामास कंसः सम्भूतिबोधकः ।।१०।। एवं सप्तमिरध्यायैः प्रमाणमिह रूप्यते । तत्राद्यः कर्ममार्गस्य ततो भक्त्या विरुद्धयते ।।११।। साधनं च फलं तस्य त्रयमत्र निरूप्यते । लौकिकारिष्टगमने कर्ममार्गः प्रवर्तते ।।१२।। अतोऽरिष्टवधो हेतुः सर्ववस्त्वर्थबोधने । फलमुद्यम एवात्र कंसस्य व्यग्रभावतः ।।१३।। सात्त्विकं तामसं चैव प्रेषयामास राजसः । अत्र वध्या राजसा हि प्रसङ्गादपरेऽपि च ।।१४।। त्रयस्त्रिंशेततोऽध्याये ह्यरिष्टवध उच्यते । नारदोक्तिस्तथा कंसमन्त्रणं च रजो महत् ।।१५।। कलाभिः साधिकैराद्यः सर्धाभ्यां वचनं तथा । त्रयोविंशतिमिः शिष्टविद्याः प्राकृतिकास्तथा ।।१६।।

## दशमस्कन्धे–चतुस्त्रिंशोऽध्यायः ।

चतुस्त्रिशे प्रेषितस्य तामसस्य निरूप्यते । कार्यं वाक्यानि च ऋषेर्लीलां काश्चित् हरेः प्रियाम् ।।१।। हेतुकार्यफलान्यत्र पूर्ववद् बोधितानि हि । केश्या गमनकार्यं तु ऋषिवाक्यात् न चान्यथा ।।२।। वधेन जातेनागच्छेदनर्थं कृतवानिति । वधो निदर्शनं तस्मात् अतो वाक्यानि बोधने ।।३।। बोधितश्चेत् हरिर्लीलां न कुर्यात् स्वेच्छया मुदा । तदा प्रमेयरीतिर्हि दुर्बलैव भवेत् सदा ।।४।। अतः फलार्थं लीला हि पूर्वजाता निरूप्यते । सिंहावलोकनं चापि करिष्यति हरिः स्वयम् ।।५।। अतो न गोकुले चिन्ता कापीत्यपि निरुप्यते । केशी हतो गुणैः कृत्वा तथा व्योम ऋषिः पुनः ।।६।। कालमात्रमुवाचेति नव षोडश वै नव ।

## दशमस्कन्धे–पञ्चत्रिंशोऽध्यायः ।

पञ्चत्रिंशे भक्तिमार्गस्थापनाय निरूप्यते । अक्रूरागमनं भक्तिः फलं चैव हि मानसम् ।।१।। सात्त्विकश्चेदभिमुखः तदा भवति भक्तिमान् । अन्यथा दैत्यसंसर्गस्तब्धा भक्तिर्भवेद् ध्रुवम् ।।२।।

## दशमस्कन्धे–षट्त्रिंशोऽध्यायः ।

षट्त्रिंशे भक्तकृपया हरी रूपमदर्शयत् । अत्यासक्तिं पूर्वसिद्धां त्यक्त्वापीति निरूप्यते ।।१।। अक्रूरेण च संवादो गमनोद्यम एव च । गोपिकानां विलापश्च भगवद्रूपवर्णनम् ।।२।। मनोरथस्य सिद्ध्यर्थं उद्यमस्य तथैव च । तत्रागत्यागत्यभावे स भिन्न इति संशयात् ।।३।। चत्वारोऽर्थाः क्रमादुक्ताः पुरुषार्था यतो व्रजे । सर्वे सिद्धा इति ज्ञानेभक्तोभूयात् तथा परः ।।४।।

## दशमस्कन्धे–सप्तत्रिंशोऽध्यायः ।

सप्तत्रिंशे तु सन्तुष्टः स्तोत्रं चक्रे मनोहरम् । चतुर्धा ज्ञातमाहात्म्य इति सिद्धान्त ईर्यते ।।१।। स्वरूपेण प्रमाणेन युक्त्या वस्तुस्वरूपतः । अवतारफलैश्चैव सर्वस्यैव विनिर्णयः ।।२।। राजसे स्तोत्रकर्तायं मध्यमो विनिरूप्यते । उत्तमे नारदो वक्ता वसुदेवादयस्तथा ।।३।। यस्य यस्य यथा भावस्तेन तादृक् निरूप्यते । सर्वं युक्तं भगवति न सर्वः सर्व एव च ।।४।।

## दशमस्कन्धे–अष्टत्रिंशोध्यायः ।

अष्टत्रिंशे ज्ञातत्त्वं श्वफल्कतनयं हरिः । विसृज्य मथुरामैक्षदुक्तो माहात्म्यबोधकः ।।१।। गोपनार्थं परीक्षोक्ता हृदयारूढबोधनम् ।

वाक्यैर्निरूपितं वर्ण्या प्रवेशे नगरी हरेः ।।२।। उत्सवे तु तथा रोधः तथात्रापि चकार ह । माहात्म्यज्ञापनार्थाय रजकं हतवान् स्वयम् ।।३।। अनिष्टेष्टप्रदो लोके महानिति निरूप्यते । वायकस्य सुदाम्नश्च वरदानं यथेप्सितम् ।।४।। प्रपञ्चविस्मृतिः सर्वा कृतानेन हि राजसे । स्वासक्तिरग्रे वक्तव्या सामान्यं तेन सेत्स्यति ।।५।।

[१]दशमसस्कन्धे–एकोनचत्वारिंशोऽध्यायः ।

एकोनचत्वारिंशे तु हरेरद्भुतकर्मणः । स्वासक्त्यर्थं राजसानां वीर्यं तस्य निरूप्यते ।।१।। अलौकिकं लौकिकं हि प्रसन्नः कुरुते फलम् । नान्यस्तत्र फलं दातुं शुक्नोतीति धनुः कथा ।।२।। लौकिकालौकिकत्वेन सामर्थ्यं लक्षणं पुनः । निरूप्यते स्वदोषस्य

निवृत्त्यै स तथापि हि ।।३।। न निवर्तत इत्युक्त्वा मल्लरङ्गकथा परा । एतावता क्लिष्टकर्मा हरिरत्र निरूपितः ।।४।। प्रमाणानां फलं ह्येतत् कार्यं चापि निरूपितम् । कुब्जाप्यत्र धनूरूपा वायुना तु तथा कृता ।।५।। आध्यात्मिको रुद्ररूपः शिष्टौ धनुषि संस्थितौ । यत् पालकं तस्य खण्डौ साधनं नाशने मतम् ।।६।। कालोऽपि विषरीतोऽभूत् दुर्निमित्तैः पतिर्द्विषां । बुद्धिर्हि न हिता तस्य प्रतिकूलेखिलं हरौ ।।७।।

## दशमस्कन्धे – चत्वारिंशोऽध्यायः।

शब्दस्य हि बलं पूर्णं सप्तभिर्विनिरूपितम् । अर्थस्यापि बलं रोधे तावद्भिर्विनिरूप्यते ।।१।। प्रपञ्चो विस्मृतः सर्वैरुत्सवाद्यैरनेकधा । माहात्म्यस्य परिज्ञानात्तदासक्तिर्निरूप्यते ।।२।। द्रष्टृणां च तथा

पित्रोः सर्वेषामेव चैव हि। पूर्वोक्तानां तथान्येषां द्वाभ्यां द्वाभ्यामुदीर्यते ।।३।। एवमासक्तिसिद्धौ हि तदेकपरता पुनः। वक्तव्येति ततो हेतोः फलं चापि निरूप्यते ।।४।। चत्वारिंशत्तमेऽध्याये कृष्णासक्तिर्निरूप्यते । दृष्ट्वा सामर्थ्यमतुलं विस्मितानामनेकधा ।।५।। प्रमेयेण निरोधोऽत्र कर्तव्यो हरिणा भृशम् । लोकाश्च दशधा भिन्नास्ततो दशविधोऽभवत् ।।१।। यस्य भावो यथा लोके तस्यानुसरणे कृते । निरोधो जायते सम्यक् अन्यथा बन्धनं भवेत ।।२।।। गुणा नवविधाः प्रोक्तास्तदभावस्तथा परः। श्रृङ्गारादिरसाश्चैव तेषामेव निरूपकाः ।।३।। राजसास्त्रिविधाः पूर्वं सात्त्विकाश्च ततः पराः। आध्यात्मिकास्तथा पूर्वं दैविकास्तु ततः परम् ।।४।।

रौद्रोऽद्भुतश्च श्रृङ्गारो हासो वीरो दया तथा । भयानकोपि बीभत्सः शान्तो भक्तिरसस्तथा ।।५।। एतान् दर्शयितुं भावान् हरिरेवं बभौ महान् । अतस्तस्मिन् गुणा एव सर्वे भावा न चान्यथा ।।६।।१७।।

## दशमस्कन्धे – एकचत्वारिंशोऽध्यायः

एकचत्वारिंशत्तमे वधः कंसस्य रूप्यते । तदीयैः सह तस्माद्धि पित्रो रोधश्च दीनयोः।।१।। बलक्षयाय लीलापि वाक्यान्यासक्तिबोधने । भक्तार्थे मारणं चास्य कंसस्यापि तथैव च ।।२।। प्रतिबन्धनिवृत्त्यर्थमेतावद्भगवत्कृतम् । निरुद्धास्तेऽपि मुक्ता हि पूर्वस्माच्च विशिष्टता ।।३।। बोधिता ज्ञानकथनादासक्तिश्च स्थितैव

हि । त्रिविधाः सर्व एवैते गुणातीतोऽपि सात्त्विकः।।४।।
अथवा ते पुनर्बाच्यास्तत्रैके मोचिताः स्वतः। निरुद्धाः सफलाः प्रोक्ताः पितरौ पूर्वतोऽधिकौ ।।५।।

## दशमस्कन्धे – द्विचत्वारिंशोऽध्यायः।

साधारण्येन सर्वेषां द्विरूपोऽपि निरूप्यते । द्विचत्वारिंशे ह्यध्याये निरोधः सर्वसम्मतः ।।१।। पित्रो राज्ञस्तथान्येषां स्वस्यापि च निरूप्यते । द्विरूपे मध्यमे रोधे यादवत्वं प्रयोजकम् ।।२।।
स्वस्य शब्दात्मके रोधः स्वज्ञायां निखिलस्य च । देवे दैत्ये च सर्वत्र कालादिष्वपि सर्वतः।।३।।

## दशमस्कन्धे – त्रिचत्वारिंशोऽध्यायः।

त्रिचत्वारिंशकेऽध्याये स्वस्थित्यैव निरोधनात् । यशोदानन्दयोश्चैव ह्युक्तोऽपि विनिरूप्यते ।।१।। गोपिकानां ततो वाच्यस्तेनोक्तं च समर्थितम् । राजसत्वं च संसिद्धं गुणोत्कर्षश्च रूपितः ।।२।।

## दशमस्कन्धे – चतुश्चत्वारिंशोऽध्यायः।

चतुश्चत्वारिंशेऽध्याये गोपीनां ज्ञानदेशतः। निरोधं सम्यगेवाह पूर्वस्माच्च विशेषतः ।।१।। याते कृष्णे लोकरीत्या नैकट्याभावतः स्फुटम् । न निरुद्धा इति प्रायः सर्वेषां च भवेन्मतिः।।२।। सेवकेनोपदेशेन प्रीत्या चैव निरोधतः । ज्ञानेनापि निरुद्धान्ता आत्मत्वेनैव सर्वथा ।।३।। वस्तुनो निश्चयः पूर्वमुपालम्भस्तथैव च । व्याजोक्त्या दोषगणना

निर्दोषो वर्ण्यते पुरा ।।४।। अन्यथा ज्ञानसन्देशो व्यर्थः स्यादिति निश्चयः। बीजं भक्तिस्ततः स्तोत्रं उपदेशस्तथैव च ।।५।। ततो दोषनिवृत्त्या च पूर्वस्नेहो निरूप्यते । ज्ञानस्य च फलं चैव कृतार्थत्वं ततस्तथा ।। सप्तधा विनिरुद्धास्ता गुणैर्भगवतापि च ।।६।।

## दशमस्कन्धे–पञ्चचत्वारिंशोऽध्यायः ।

एवं पूर्वनिरोधस्य सान्त्वनोत्कर्षवर्णनम् । कृत्वा भविष्ययोश्चैव सान्त्वनं विनिरूप्यते ।।१।। मथुरावासिनः सर्वे राजसाः परिकीर्तिताः। सात्त्विकाः पाण्डवा भक्तास्तयोः सान्त्वनमुच्यते ।।२।। राजसत्वप्रसिद्ध्यर्थं स्त्रीपुंसोरत्र वर्णनम् । प्रक्रियान्तररूपा हि किञ्चिद्द्वारा तथा कृताः।।३।। अक्रूर उद्धवान्मुख्यः ततोऽग्रे

प्रेषणं मतम् । दासभावे तूद्धवस्तु शास्त्रतस्त्वयमेव हि ॥४॥
स्त्रीसान्त्वनं तु पुरतः राजसत्वात्स्वरूपतः। वाच्यान्यस्य निरूप्यं
हि स्तुत्या च प्रेषणेन च ॥५॥ पञ्चचत्वारिंशेऽध्याये
कुब्जाक्रूरातिसान्त्वनम् । कायेन वचसा चक्रे भाव्यार्थमिति
वर्ण्यते ॥६॥ दशभिः स्तुतिरुक्ता हि प्रार्थनैकेन दोषनुत् ।
सर्वैर्भावैरिह स्तुत्यो निरोधे ह्यधिकारिभिः ॥१॥ सर्वेष्वेव च
भावेषु कृष्णोत्कर्षो निरूप्यते । अयुक्तं प्रार्थयेद्यस्तु तस्मै
दद्यान्न सर्वथा ॥२॥ न दत्तं पूर्वं गोपीभ्यः नोत्तरस्यापि
दास्यति । निरोधो ह्यन्यथा न स्यात् फलार्थं कर्म तद्भवेत्
॥३॥ ईश्वरः सर्वहितविदतो रोधो न दूषणम् । यथा

बालकरोधो हि पित्रापि विनरूपितः ।।४।। निवर्तयति कामांस्तान् ज्ञानेन ग्रहिला मतिः। यदि स्यादुत्कटा दुष्टा निर्दुष्टा वा विचारतः ।।५।।१७।।

## दशमस्कन्धे–षट्चत्वारिंशोऽध्यायः।

षट्चत्वारिंशकेऽध्याये सात्त्विकानां निरूप्यते । सान्त्वनं चान्यमुखतो निरोधो ह्यधिकारतः ।।१।। भगवत्प्रेषितोऽक्रूरः कृत्वा सान्त्वनमग्रतः। ज्ञानेन तत्प्रतीकारं मत्वा तच्चोक्तवान् स्वयम् ।।२।। पाण्डवैर्ज्ञापिताशेषो विचारे कुशलो यतः। अतः स्थित्वा गतिं बुद्ध्वा स्वशक्तिं ज्ञातवांस्ततः ।। अन्यया भगवत्कार्यं निरोधो न भविष्यति ।।३।।

## [१]दशमस्कन्धे उत्तरार्ध – प्रथमोऽध्यायः।

उत्तरार्धे हरेर्लीला स्वतः सर्वात्मना कृता । यदर्थमवतीर्णोऽसौ सा निरूप्या विभागशः ।।१।। एषा निरोधलीलैव स्वसंसारपरा परम् । भगवांश्च तदीयाश्च तच्छास्त्रं चेति स त्रिधा ।।२।। चतुर्दशभिरध्यायैः प्रमाणं तस्य रूप्यते । तदीया एकविंशत्या षड्भिः स च निरूप्यते ।।३।। कृतिः प्रमाणं तु हरेः स्वतश्चान्यानुरोधतः । सप्तभिः सप्तभिः प्रोक्ता गुणैर्युक्ता हरिस्तथा ।।४।। वाक्यात्तदीया विज्ञेयास्तस्यैव न तु शास्त्रतः। एकविंशविधं सर्वं श्रुत्वा तद्बहुधोदितम् ।।५।। षड्गुणैर्भगवान् रूप्यस्तेषु सर्वं प्रतिष्ठितम् । तत्र तु प्रथमेऽध्याये स्वावतारप्रयोजनम् ।।६।। निरूप्य क्षात्रधर्मेण जयोऽन्यश्च निरूप्यते

। राजसानां साधने तु निरोधे भगवत्कृतिः ।।७।। सर्वथा साधनमिति तदेवादौ निरूप्यते । विवाहपुत्रजन्मान्ता सा निरूप्या विशेषतः।।८।।अलौकिकं ततः स्थानं निरूप्यमिति रूप्यते । तस्योपद्रवनाशाय भ्रमोत्पादमीरितम् ।।९।। निग्रहानुग्रहौ चैव प्रसङ्गात् सुनिरूपितौ । अन्यथा लौकिकी लीला कृष्णस्य स्यान्न चान्यथा ।।१०।। त्रिविधो हि क्षत्रियाणां विवाहः परिकीर्तितः । गान्धर्वो राक्षसश्चैव विहितश्च स्वगृह्यतः ।।११।। पुत्रस्यापि कथा वाच्या ह्यन्येनापि समर्पिताम्। भार्यामाहुः क्षत्रियस्य तत्प्रसङ्गत्तथा परा ।।१२।। सत्यभामाविवाहान्ता कथेयं विनिरूपिता । त्रिविधं दुःखमादौ हि भक्तानां विनिरूपितम् ।।१३।। भूमेर्मातुर्वैष्णवानां वैकुण्ठादागतिर्यतः । द्वयमप्यत्र मथुरात्यागे हेतुर्निरूप्यते ।।१४।। प्रमाणरक्षासिद्ध्यर्थमनिवार्य

तु तद्द्वयम् । निवार्यः सप्तदशधा ब्रह्माण्डे तु प्रजापतिः।।१५।। स सप्तदशधा प्रोक्तस्तन्निवृत्तावशक्यता । अतोऽत्र प्रथमं वाच्यं कृतिशक्यमनेकधा ।।१६।। उत्तरार्धसमैः श्लोकैरतिदेशस्ततः परम् । द्वाभ्यां कलाभिरपरः साधिकाभिरिति स्थितिः।।१७।।

दशमस्कन्धे उत्तरार्धे – द्वितीयोऽध्यायः ।

निग्रहं प्रथमेऽध्याये निरूप्य हरिणा कृतम् । द्वितीयेऽनुग्रहं प्राह मुचुकुन्दाय यत्कृतम् ।।१।। तामसी हननाख्या हि राजसी नगरोद्यमा । सात्त्विकी नयनाख्या च निर्गुणा निर्गमस्तथा ।।२।। निर्गुणस्य निमित्तत्वं न तु कर्तृत्वमीर्यते । प्रबोधो मरणं चैव संवादश्च यथाक्रमात् ।।३।। स्तुतिश्च निर्गुणा प्रोक्ता तदग्रे हि फलिष्यति । अतो निर्गुणलीलात्र द्वितीये विनिरूप्यते ।। किया भगवतो द्वेधा गुणेषु स्वे यतः स्थिता ।।४।।

## दशमस्कन्धे उत्तरार्धे – तृतीयोऽध्यायः ।

पुरुषानुग्रहं पूर्वमुक्तवा भगवता कृतम् । स्त्रीषु तं विस्तरेणाह रूपत्रयविभेदतः ।।१।। अनुग्रहः कालतुल्यस्ततो द्वादशधोदितः। तत्र मुख्या तु लक्ष्मीः स्यात्तस्यां त्रेधा हरेः कृपा ।।२।। मानसेनाथ कायेन वेदेनेति निरूप्यते । गान्धर्वो मानसः प्रोक्तो दूरत्वाद्वचनाभिधा ।।३।। कृष्णानुग्रहयुक्तानां कृतार्थत्वे ततः परम् । स्त्रीणां मुक्तिर्निरूप्येति मुचुकुन्दतपः कथा ।।४।। प्रसङ्गात्तामसानां हि वधो देवहिताय हि । पलायनं लीलयैव सोऽप्यनुग्रह ईर्यते ।।५।। सात्त्विके राजसे चैव तामसे च हरेः कृपा । इति दर्शयितुं राज्ञो वृत्तं लक्ष्म्याः शिवस्य च ।।६।।

## दशमस्कन्धे उत्तरार्धे – चतुर्थोऽध्यायः।

शतार्धे वा चतुर्थे वा भगवान् भार्ययार्थितम् । विप्रार्थिनं च कृतवानिति सम्यङ् निरूप्यते ।।१।। प्रसह्य कन्याहरणमुद्योगावधि वर्ण्यते । कायावाङ्मनसामत्र ह्यैकमत्यं निरूप्यते ।।२।।

## दशमस्कन्धे उत्तरार्धे – पञ्चमोऽध्यायः ।

यावन्निवर्तते चित्तं तदीयानां स्वभावतः। तावदन्यस्य विषयो भगवांस्तं न मन्यते ।।१।। अतो विधिविवाहार्थं तन्निराकरणं पुरा । त्रिविधानां निरूप्यं हि युद्धमुण्डनबोधनैः ।।२।। उदासीनाः स्वकीयाश्च स्वयं चेत्यत्र शत्रवः। मध्यमं भगवत्कार्यमनुकल्पो यतस्तथा ।।३।। उत्तरार्धे पञ्चमे तु विवाहो वर्ण्यते हरेः। रुक्मिण्या सर्वभावेन तद्दोषान् विनिवर्त्य हि ।।४।। स्वरूपाज्ञाननानात्वे

देहादीनां च शत्रुता । दोषत्रयं निरूप्याहो आत्मधर्मनिरूपणम् ।।१।। स्वप्रकाशोऽयमात्मा हि असङ्गश्च निरूप्यते । जन्मादिदोषास्त्वन्यस्य अतस्तैर्नैव दुष्यति ।।२।। असंसर्गाग्रहो भ्रान्तः दृष्टान्तैर्विनिरूप्यते । ततोपसंह्यतिर्युक्ता ज्ञानेनाज्ञाननुत्तये ।।३।।४२।।

## दशमस्कन्धे उत्तरार्धे – षष्ठोऽध्यायः ।

निरूपितो भगवतो भार्यायास्तु परिग्रहः। षष्ठाध्याये तु पुत्रस्य स्वीकारोऽत्र निरूप्यते ।।१।। लोके हि पुत्रभार्याणां सम्बन्धे स्याद्धि संसृतिः। दुष्टभावेषु संसृष्टास्त्वत्र कृष्णेन मोचिताः ।।२।। न चापि भगवान् कृष्णः कमप्यत्र निवारयेत् । भागिनं यत्र यो भागी निवृत्ते हरिसाद्भवेत् ।।३।। अतः शम्बरनिर्मुक्तः पुत्रो जात इतीर्यते । पुत्रत्वं च न कालादेः किन्तु स्वेच्छात एव हि ।। तादृशस्य हि जीवस्य ततः कामकथोच्यते ।।४।।

## दशमस्कन्धे उत्तरार्धे–सप्तमोऽध्यायः ।

सप्तमे कामतः प्रोक्तो विवाहस्तामसः परः। सात्त्विकश्च प्रसङ्गेन क्लेशनोभे निवारिते ।।१।। क्लेशापनोदनार्थाय चौर्यमत्र निरूप्यते । वाचिकं कायिक चैव कायेन वचनेन च ।।२।। सम्बन्धी च तथा भक्ताः स्वापराधापनुत्तये । सत्यभामा जाम्बवती ताभ्यां सम्यक् निरूप्यते ।।३।। गुणा एतास्ततोग्रे तु विद्यारूपा निरूपिताः। एवमष्टौ महिष्यो हि सात्त्विक्यस्तु ततः पराः ।।४।। विवाहाः सप्त कामेन कृपया तु सहस्त्रशः। विधितस्त्वेक एवोक्तो द्वयोरत्र निरूप्यते ।।५।। सर्वात्मनान्यहृदयं न गृह्णाति हरिः स्वयम् । सर्वात्मनाऽप्रपन्नं च नाशायेव सुयोधनम् ।।१।।३८।।

## [१]दशमस्कन्धे उत्तरार्धे अष्टमोऽध्यायः ।

निरोधो मानरूपोऽत्र सप्तभिर्विनिरूपितः। मेयरूपश्च तावद्भिः प्रमेयबलमुच्यते ।।१।। अपकारिषु भक्तेषु तथा साधारणेषु च । फलप्रकरणं ह्यतत्तेन तादृङ् निरूप्यते ।।२।। कामः फलं यथा पूर्वं क्रोधस्त्वत्र तथा फलम् । राजसानां विशेषेण जयस्त्वत्र फलिष्यति ।।३।। हरिधर्मैश्च हरिणा बलभद्रेण यादवैः। जयो निरूप्यते लोके निरोधात्मा हि राजसः।।४।। तत्राष्टमे तथाध्याये कृष्णेच्छाया जयस्त्रिधा । सत्राजिच्छतधन्वा च अक्रूरश्च जितास्तथा ।।५।।

## दशमस्कन्धे उत्तरार्धे–नवमोऽध्यायः।

नवमे पञ्चकन्यानां विद्यापर्वस्वरूपतः । विवाहः प्रोच्यते सम्यक् कृष्णेनाशेषमुक्तये ।।१।। मायासम्बन्धदोषेण क्रोधः कामस्तथा परः। निराकृतः सर्वमुक्त्यै विद्याफलमतः परम् ।।२।। त्रैलोक्यसुखदानं च मायादोषनिवारणम् । द्वाभ्यां तथैव सर्वेषां राजसे पूर्णता ततः।।३।। विद्यायाः सूर्यमुख्यत्वात्प्रथमा दुहिता रवेः। विपक्षनिग्रहात्मत्वात् द्वितीया सोमवंशजा ।।४।। मार्गद्वयं हितार्थाय द्वयं स्वीकृतवान् हरिः। भक्तानभक्तानालक्ष्य तृतीया सूर्यवंशजा ।।५।। भक्तिरूपा प्रयत्नेन याचयित्वा स्वयं गतः। व्यसनानि निराकृत्य तदुद्वाहं चकार ह ।।६।। अग्रे बाधास्तु भक्तेन ह्यर्जुनेन निराकृताः। ज्ञानभक्त्योरतो भूयान्

पर्वणोरुद्यमः कृतः।।७।। धर्मस्नेहौ तयोरङ्गं मध्यमो लौकिकः स्मृतः। द्वयोः स्वतन्त्रतासिद्ध्यै जीवानां तु ततो द्विधा ।।८।। भक्तिज्ञानफले कृष्णः पुंसां स्त्रीणां चकार ह । अतो दत्तां स्वयं दत्तामक्लेशक्लेशभावनात् ।।९।। उपयेमे स्वयं कृष्णस्तासु सर्वं प्रतिष्ठितम् । ततः सर्वकलाभिस्तु हरिः पूर्णो निरूप्यते ।। स षष्ठो भगवानेवं निःसन्दिग्धो निरूपितः ।।१०।। क्षुत्पिपासे तथा रोगाः कर्माणि द्विविधानि च । लोकोपद्रवरूपाणि चत्वार्यावश्यकानि हि ।।१।। द्यूतं पानं स्त्रियश्चेति त्रीण्यनावश्यकानि हि । मृगयादिर्न सर्वेषां तस्मान्न व्यसनानि हि ।।२।। विशेषेणासनं यत्र व्यसनं तत्प्रकीर्तितम् । ज्ञातेऽपि दोषे यस्यास्ति न निवृतित्तस्तदेव तत् ।।३।३४।।

## दशमस्कन्धे – उत्तरार्धे दशमोऽध्यायः।

सर्वासामुद्वृतिः पूर्वं संक्षेपेण निरूपिता । दशमे विस्तरेणाह तामेवान्यविभाषया ।।१।। यदर्थमवतीर्णोऽसौ नात्यन्तं तत्र मृग्यते । हेतुरित्यत्र निर्णीतमस्ता जगृहे हरिः ।।२।।

## दशमस्कन्धे–उत्तरार्धे एकादशोऽध्यायः।

वाचिकस्तु तिरोभावो रूक्मिण्यामुच्यते स्फुटः। एकादशे निरोधार्थमन्यथा लौकिकं भवेत् ।।१।। सर्वथा कृतसेवायाः परीक्षापि निरूप्यते । यथा प्राणे शरीरस्य स्थितिस्तद्वद्यथा भवेत् ।।२।। सान्त्वनं कायिकं त्वत्र निःसम्बन्धाद्यतो भयम् । दोषाभावाय वाक्यं तु ईर्ष्यामात्सर्यदोषनुत् ।।३।। निर्दुष्टायाः परिज्ञानमविरोधस्य वर्णणात् । निरूप्यते यतः सा हि न

कुतश्चिद्भ्रमं भजेत् ।।४।। शब्दार्थयोर्विरोधः स्यात् प्रामाण्ये सर्वथैव हि । लक्षणायामपि तथा मुख्यार्थो बाधितो यतः।।५।। अतो हि भगवद्वाक्यं दुर्ज्ञेयं सर्वथा मतम् । यस्त्वेतस्य परिज्ञाता स न मुह्यति कर्हिचित् ।।६।।

## दशमस्कन्धे – उत्तरार्धे द्वादशोऽध्यायः।

द्वादशे रमणं प्राह पुत्रपौत्रयुतस्य हि । प्रसङ्गान्मारणं चोक्तं रुक्मिणः प्रतिबन्धनुत् ।।१।। भगवान् केवलं लोके क्रीडार्थं न समागतः। किन्तु सर्वोद्धारणाय तदुद्वाहेऽपि मारणम् ।।२।। कलौ शुद्धक्षत्रियो हि न स्थाप्य इति निश्चयात् । पापं विवाहमकरोत् फलं तस्याप्यसूचयत् ।।३।। देवकीप्रीतये वंशः स्थाप्य एवेति

तत्तथा । तदानीं सर्वधर्माणां सम्यक् स्थितिनिरूपणे ॥४॥ 'दशास्या' मिति वाक्येन दशपुत्रनिरुपणम् । यथोक्तं श्रुतिसिद्धं हि कर्तुं नान्यः क्षमो भवेत् ॥ लोकवेदौ पुरस्कृत्य रमणं तत्तथोच्यते ॥५॥

दशमस्कन्धे उत्तरार्धे त्रयोदशोऽध्यायः ।

निरोधे राजसफले देवानां विजयः स्फुटः । निरुप्यते यतो रुद्धाः नान्यं सम्भावयन्ति हि ॥१॥ त्रयोदशे ततोऽध्याये हेतुस्तस्य निरूप्यते। अनिरुद्धप्रसङ्गेन धर्मः सिध्यति तेन हि ॥२॥ सर्वथाप्युपकारित्वात्सर्वतो भयशङ्कया । परमानन्दरूपत्वात्सफलो

राजसः स्मृतः।।३।। अनिरुद्धो निरोद्धव्यो निरुद्धो येन केनचित् । तन्मूलाः सर्व एवैते विनिरुद्धा भवन्ति हि ।।४।। स्वप्नेऽपि चेत्प्रसङ्गः स्याद्बद्धो भवति मानवः। अन्येन वा तथा ज्ञातः किमु साक्षात्तथाविधः।।५।।

दशमस्कन्धे उत्तरार्धे चतुर्दशोऽध्यायः ।

चतुर्दशे तु विजयः शिवादीनां निरूप्यते । निरोधो राजसः पूर्णो भविष्यति यतः फले ।।१।। भक्तवत्सलता दृष्टा न निरोधः क्वचित्तथा । अतोऽन्यनाशशङ्कापि भजनान्तरबाधिका ।।२।। न बाधते हरिः क्वापि विरुद्धोऽपि कथञ्चन । अक्लिष्टत्वाय तु हरेरुपेक्षात्र निरूप्यते ।।३।। प्रद्युम्नवत्तु तस्यापि नयनेऽन्वेषणं नहि ।

अत्रापि नारदः प्रोक्तः प्रमाणं चिन्तनाधिके ।।४।। सर्वभावेन युद्धाय ज्वरोपाख्यानमुच्यते । तामसस्तु ज्वरोऽत्रैव समुत्पन्नस्तथोत्तमः।।५।। शीतरोरौ पृथक् पूर्वमुत्पन्नौ मिलितौ नहि । अतो हि भगवानत्र मेलयामास सर्वथा ।।६।। स्वरूपबलकार्याणि जानतो मम सर्वथा । रक्षा त्वयैव कर्तव्येत्येवंरूपा स्तुतिः कृता ।।१।।२४।। ंयादृशो भगवान् कृष्णः स योगेनैव गम्यते । दृश्यमानस्तु शास्त्रेण विसंवादी हि दृश्यते ।।१।। इति ज्ञापयितुं प्रोक्ता भूम्यादीनां तथाङ्गता । अङ्गान्यपि हरेर्लोके भिन्नानीति विदुर्यतः।।२।। अस्मदर्थं च भगवान् समागत इति स्तुतिः। निर्दोषपूर्णगुणकोऽप्यस्मदादिभिरीयते ।।३।। यथाधिकारं तत्रापि हेतुर्हि भगवान्परः। अन्तरायस्त्वदज्ञाने यदासीत्तस्य च स्वयम् ।।४।।

प्रकाशको महान् साक्षादतोऽस्माकं हितो भवेत् । कृष्णेच्छयैव सर्वेषामेव बुद्धिविपर्ययः।।५।। अन्यथा धनपुत्रादौ कथं मुग्धा विवेकिनः। तस्मात्पूर्वापरधानां क्षमा नित्या हरौ परे ।।६।। तथापि चेन्न सेवन्ते व्यर्थजीवास्तु ते मताः। अनेन भजनं प्रोक्तं बाणोऽपि भजते यतः।।७।। प्राकृता भजने हेतुर्दुर्दृष्टं निरुप्यते । वयं तु लोकरीत्यैव भवदुत्कर्षहेतवे ।।८।। युद्धार्थमागताः किन्तु भक्ता एव न संशयः। प्रकटेन प्रकारेण शरणागतिरुच्यते ।।९।। तादृशस्य हितं यस्मात् कर्तव्यमिति सार्थना ।।१०।।३४।।

## दशमस्कन्धे उत्तरार्धे पञ्चदशोऽध्यायः।

राजसप्रक्रिया पूर्णा तत्त्वैरिन्द्रियशोधिका । निरूपिता नातियत्ना सात्त्विकीत्वधुनोच्यते ।।१।। अध्यायैरेकविंशत्या वसुदेवमखावधि

। चतुर्धा रूप्यते षड्भिः षड्भिः षड्भिस्त्रिभिस्तथा ।।२।। अर्थो धर्मस्तथा कामः मोक्षश्च त्रिविधोऽन्ततः । प्रकीर्णकाख्यानवती प्रक्रियेयमिहोच्यते ।।३।। नात्र कमविवक्षा हि नृगः पूर्व निरूप्यते । गोप्यः पश्चात्ततो मिथ्या वासुदेवः प्रकीर्तितः।।४।। धर्मकामार्थयुक्ता हि प्रमाणेनैव पोषिताः। द्विविदो लक्ष्मणा चैव नारदश्च त्रयः स्मृताः।।५।। एतेषामर्थसिद्धिर्हि षड्विद्या प्रोच्यते स्फुटैः। ततः साधारणो धर्मो विशिष्टः पञ्चभिस्ततः।।६।। यथा कामकथा षड्भिस्त्रिभिर्मोक्षस्तथोच्यते । अर्थोऽनर्थः सर्वथैव धर्मार्थमपि योजितः ।।७।। तस्यापि भगवानर्थः स निरुद्धः फले परम् । अर्थो ब्राह्मणसम्बन्धरहितश्चेत् परः स्मृतः।।८।। दृष्टान्ततो निरूप्यादौ भगवानाह तत् स्फुटम् । उत्तरार्धे पञ्चदशे नृगमोक्षो निरूप्यते ।। शिक्षा च सात्त्विके भावे राजसा यादवा यतः।।९।।

## दशमस्कंधे उत्तरार्धे – षोडशोऽध्यायः।

विशेषे सात्त्विके रोधे तामसादिविभागतः। पूर्वं राजसमापन्नाः सत्त्वभावं तथानयत् ।।१।। तेषां सात्त्विकरूपाणां सकामत्वाद्बलेन हि। निरोधं कारयामास षोडशे तन्निरूप्यते ।।२।। ततः स्वरूपभावानां दुष्टानां दोषनुद्धरिः। प्रसङ्गादिदमत्रोक्तं वाराणस्यास्तु दाहनम् ।।३।। बलस्तामसभावानां राजसानां तथैव च । सात्त्विकानां तथा मानखण्डकः सुनिरूप्यते ।।४।। ततः स्त्रीणां तु भगवान् एकेनैव करिष्यति । सप्तमास्त्रय एकत्र धर्मिणः पृथगीरिताः।। एवं प्रमेयबलतो निरोधः पञ्चधा भवेत् ।।५।।

## दशमस्कन्धे उत्तरार्धे – सप्तदशोऽध्यायः।

कामस्य पूर्तिमुक्त्वात्र क्रोधस्यापि निरूप्यते । कंसादेरिव दुष्टानां मोक्षोऽत्र विनिरूप्यते ।।१।। सस्थानस्य सदेवस्य पोषकैः सहितस्य च । विपक्षिणो नाशरूपः पूर्वस्माद्वचसा पृथक् ।।२।। लौकिकैरपि वाक्यैर्यः कामादौप्रविशेत् पुमान् । तं कृष्णो मोचयेत् सत्यं सर्वथेति निरूप्यते ।।३।। पौण्ड्कस्य समित्रस्य कर्मोपासनसंयुतौ । साधारवंशमात्रस्य नाशः सप्तदशेऽभवत् ।।४।।

## दशमस्कन्धे उत्तरार्धे – अष्टादशोऽध्यायः

बलस्य चरितं वक्ष्यन् तदभावात्तु पौण्ड्रकः । तथोक्तवानिति ह्युक्तं अर्थादेतद्बलस्य हि ।।१।। बलरूपहरेः कार्यं न समाप्तमिति

स्थितिः। अतो विशेषतो वक्तुं प्रश्नो राज्ञो निरूप्यते ।।२।। अष्टादशे तु द्विविदवधः सम्यङ् निरूप्यते । गोपिकानामिवात्रापि स्त्रीणां माहात्म्यबोधने ।।३।। बलस्त्रियोऽन्यथा त्वत्र निरुद्धा न भवन्ति हि । तदा विभागो व्यर्थः स्यान्निरोधानुपयोगतः।।४।। ततः सर्वजनीनं च चरित्रं हि करिष्यति। यस्यावेशस्य चरितमेवं तस्य किमद्भुतम् ।।५।।

दशमस्कन्धे उत्तरार्धे – एकोनविंशोऽध्यायः।

अत्यलौकिकमाश्चर्यचरित्रमधुनोच्यते । एकोनविंशे रामस्य सर्वलोकातिशायिनः ।।१।। एवं रामस्य कृष्णस्य त्रितयं त्रितयं द्वयोः। चरित्रमीरितं च स्यात् षड्गुणाननां विभागकृत् ।।२।। धर्मः सिद्धो भगवति कामः सिद्धस्तथापरे । अद्वितीयहरित्वं तु कृष्णे सिद्धं फलत्वतः।।३।। जगद्दोषनिवृत्तिस्तु रामे सिद्धा हि साधने ।

अलौकिकं साधनस्थं रामे कृष्णे फलं तथा ।।४।।
अत्रावान्तरभेदानां धर्मिणः पृथगीरिताः। विभागज्ञापनार्थाय यथैवं विनिरूप्यते ।।५।। यमुनायां पर्वते च कृतं पूर्वं निरूपितम् । गङ्गायामपि यत्कार्यं तदत्र स्फुटमुच्यते ।।६।। लक्ष्मणोद्वहने बद्धः साम्बो रामेण मोचितः। निगृहीता विपक्षाश्च तदत्र स्फुटमुच्यते ।।७।। कीडार्थत्वं तत्र हेतुर्महत्त्वं चापि सान्त्वने । अन्यार्थं च समारम्भः शरणं च वयं गताः।।१।।४४।।

दशमस्कन्धे उत्तरार्धे – विंशोऽध्यायः।

सात्त्विकानां निरोधे तु मुख्यो नारद ईरितः। अतस्तस्यापि वक्तव्यं पूर्वबुद्धेर्निवारणम् ।।१।। भक्तिमार्गानुरोधस्य पृथक्त्वं स्याद्यतः

स्फुटम् । विंशे नारदद्दष्टानां कृष्णानां चरितं महत् ।।२।। अलौकिकत्वसिद्ध्यर्थं निरोधे विनिरूप्यते । प्रकीर्णके प्रकरणे न सङ्गतिरिहोच्यते ।।३।। तथापि साम्बकथने समायातस्तथाकरोत् । भ्रान्त्यभावाय भगवान् बाधयामास तादृशम् ।। निरोधस्तेन संसिद्धः सात्त्विकानामतः परम् ।।४।।

## दशमस्कन्धे उत्तरार्धे – एकविंशोऽध्यायः।

सात्त्विकानां निरोधे तु प्रमेयबलतः पुरा । षड्भिः सर्वे निरुद्धास्ते साधनेनोच्यतेऽधुना ।।१।। षड्भिरेव तथाध्यायैर्धर्मोऽत्र भगवत्कृतः। कारितश्च द्विरूपो हि वर्ण्यतेऽन्यनिषेधने ।।२।। तत्रैकविंशे त्वध्याये धर्मो हि भगवत्कृतः। निरूप्यते यतो लोका जाता हरिपराः

स्वतः।।३।। सर्वान् धर्मान् विशेषेण तत्तद्भेदेन चैव हि । पूर्वाध्याये निरूप्यैव ह्याह्निकं ह्यत्र रूप्यते ।।४।। तेनैव शुद्धचित्तास्ते राजानः सात्त्विकास्तथा । प्रपन्नाः सर्वथा कृष्णे प्रयोजनमिदं मतम् ।।५।। अन्यथा ह्याह्निको धर्मो निष्प्रयोजनतां व्रजेत् । सभायां गमनं चैव रक्षां सूचयति क्षतात् ।।६।।

## दशमस्कन्धे उत्तरार्धे – द्वाविंशोऽध्यायः ।

द्वाविंशे धर्मरक्षार्थं धर्मस्थानगतिर्हरेः। सर्वसंमतियुक्तस्य शोभा युक्ता निरूप्यते ।।१।। एका कृतिर्हरेरत्र बहुकार्यनिरूपिका । निर्धार्यते सर्वसुखा धर्मे सर्वाधिकारिणी ।।२।।

## दशमस्कन्धे उत्तरार्धे – त्रयोविंशोऽध्यायः।

निरोधः सात्त्विकानां हि सगुणानां निरूपितः। धर्मप्रसङ्गे शुद्धानां तेषां दुःखं निवार्यते ।।१।। त्रयोविंशे जरासन्धवधः क्लेशहरो महान् । निरूप्यते यतः सर्वसात्त्विकाः सुखिनोऽभवन् ।।२।। त्रिविधाः सात्त्विकाः प्रोक्ता राजानो यादवास्तथा । पाण्डवाश्च ततस्तेषु द्वयोरिष्टो वधः स्फुटः।।३।। पाण्डवानामिष्टतायै प्रसङ्गोऽप्यत्र रूप्यते । भक्तानां कर्मिणां चेत्स्यादिष्टं मागधनाशनम् ।।४।। तदैव नाशनं युक्तं ब्रह्मण्यस्य दयावतः। ब्राह्मणस्याप्यालभनं यज्ञार्थं हि निरूप्यते ।। ब्रह्मण्ये तत्र को मर्षः क्षत्रिये विमुखे हरेः ।।५।।

## दशमस्कन्धे उत्तरार्धे – चतुर्विंशोऽध्यायः।

चतुर्विंशे विमुक्तानां ज्ञानेनाज्ञानमोचनम् । विषयात्मसमृद्धिं च प्राह कृष्ण इतीर्यते ।।१।। स्वधर्मैश्चेन्न पुष्टाः स्युर्निरोधस्तर्ह्यनर्थकः। अतः स्वासक्तिसिद्ध्यर्थं ज्ञानराज्ये ददौ हरिः।।२।। सगुणास्ते महात्मानो गुणातीतं हरिं मुदा । नवभिः श्लोकयामासुर्निर्गुणत्वाय सर्वशः।।१।। प्रार्थना मत्सराभावो गतराज्यानुमोदनम् । युक्तिस्तत्र स्वादोषोक्तिः स्वभाग्यस्याभिनन्दनम् ।।२।। वैराग्यमुपदेशस्य प्रार्थना स्वाधिकारिता । क्रमान्निरूपिता ह्यर्था यतस्तान् सुष्टवबोधयत् ।।३।।७।। जिज्ञासार्ती तदधिकारे द्वयमस्तीति वै हरिः। सात्त्विकेभ्यो मुख्यशास्त्रं सगुणं प्राह योग्यतः।।१।। स्वकीयान् षड्गुणान्प्राह

षड्भिः सर्वत्र दुर्लभान् । भक्तिदानं बुद्धिशंसा राज्यदोषः कृपाकृतिः।।२।। ऋणत्रयं निराकृत्य तत्र चिन्ता विरागता । एवं धर्मैर्हरिप्राप्तिरिति वाक्यार्थसङ्ग्रहः।।३।।१७।।

दशमस्कन्धे उत्तरार्धे – पञ्चविंशोऽध्यायः।

पञ्चविंशे निरुद्धस्य राज्ञो धर्मो निरूप्यते । प्रतिबन्धविहीनस्य प्रेमगद्गदचेतसः ।।१।। आधिदैविकयज्ञोऽपि धर्मेऽत्र विनिरूप्यते । तत्रापि बाधकं कृष्णो न्यवारयदितीर्यते ।।२।। मोचनादेव राज्ञां हि तत्सेवाऽत्र निरूपिता । ब्रह्मण्यत्वान्मागधस्य ब्राह्मणेष्वत्र संशयः ।।३।। अतः सर्वेऽत्र ऋषयो निरूप्यन्ते स्वनामतः। आधिदैविकयज्ञस्य सर्वोऽप्युत्कर्ष उच्यते ।। आध्यात्मिकस्तु तच्छेषः प्रधानार्थे यतः परः।।४।।

## दशमस्कन्धे उत्तरार्धे – षड्विंशोऽध्यायः।

षड्विंशे राजसूयस्य भूमारहरणे यथा । कारणत्वं तदर्थं हि मानभङ्गो निरूप्यते ।।१।। यथान्यद्भगवत्कर्म मुख्यं कंसवधादिकम् । राजसूयकृतिस्तद्वत् भूमारह्यतिकारणम् ।।२।। स्वातन्त्र्ये तु हरेरत्र गौणतेति निरूपणम् । हरेः कथायां तस्यात्र न युक्तमिति निश्चयः।।३।। लौकिक्येव समृद्धिर्हि तस्याभिमतिकारणम् । अतः सैवात्र पूर्वोक्तादधिका वर्ण्यते स्फुटा ।।४।। तस्माद्भाषा लौकिकीयं भावादङ्गं न सर्वथा । न विरोधस्ततः पूर्वैर्नाग्रिमैरपि वाचकैः।।५।।

## दशमस्कन्धे उत्तरार्धे – सप्तविंशोऽध्यायः।

सात्त्विकानां निरोधस्तु षड्भिरेवं निरूपितः। साधनांशः फलांशस्तु षड्भिरग्रे निरूप्यते ।।१।। फलं तु त्रिविधं प्रोक्तं शत्रुनाशो यशस्तथा

। अलौकिकी तथा संपद् द्वाभ्यां द्वाभ्यां निरूप्यते ।।२।। बन्धूनां च तथांशस्य मित्रस्येति पृथक् पृथक् । बन्धूनां कृष्णसद्भावान्नान्यत्रेच्छा कथञ्चन ।।३।। सहागतस्य त्वंशस्य कीर्तिरिवेप्सिता भुवि। मित्रस्य लक्ष्मीवैमुख्यात् संपत्तिर्वाञ्छिता क्वचित् ।।४।। परोक्षे दारदृष्टो हि मित्रत्वमुपयाति हि । अत्रादौ द्वारकास्थानां बन्धूनां च तथा क्वचित् ।।५।। अनिवार्यं दुःखमुक्तं द्वितीयेन निवार्यते । सप्तविंशे तथाध्याये यादवानां महद्भयम् ।।६।। महादेवादिपुष्टेभ्यः शाल्वादिभ्यो निरूप्यते । अप्रत्याख्येयता सिद्ध्यै प्रद्युम्नाय जयो महान् ।। निरूपितः समस्तानां यतः स्यात्तु महद्भयम् ।।७।।

## दशमस्कन्धे उत्तरार्धे – अष्टाविंशोऽध्यायः ।

अष्टाविंशेऽतिपीडायां भगवत्स्मरणे कृते । तद्दुःखवारणं कृष्णश्चकारेति निरूप्यते ।।१।। द्युमतोऽपि वधं कृष्णश्चेत्कुर्यात्स्वयमागतः। तदा प्रद्युम्नदुःखस्य न निवृत्तिर्भवेत् क्वचित् ।।२।। अतः प्रद्युम्नहस्तेन मारणं तस्य रूप्यते । भक्तानां दुःखदानं तु न युक्तमिति वै हरिः।।३।। मतान्तरेणाशक्यत्वं बोधयामास वाक्यतः। अन्यथा श्रीशुको लीलां तादृशीं नैव वर्णयेत् ।।४।। तादृग्लीलान्तरमिव वर्णितां वा न दूषयेत् । एवं सिद्धान्तमज्ञात्वा लोको भ्राम्यति सर्वथा ।।५।। कल्पान्तरे तथा चक्रे सूक्ष्मांशस्यावतारतः। निरोधे यदि नो ब्रूयात् सिद्धान्तो हि

विरुध्यते ।।६।। शास्त्रार्थे दोषनाशाय निराकरणमुच्यते । अतः स्कन्धार्थशास्त्रार्थौ पक्षाभ्यामिह रूपितौ ।।७।।

## दशमस्कन्धे उत्तरार्धे – एकोनत्रिंशोऽध्यायः।

बलभद्रस्य सत्कीर्तिरध्यायद्वितयेन हि । निरूप्यते ऋषिप्रोक्ता येनासौ सुस्थिरी भवेत् ।।१।। तीर्थाभिषेकाद् यज्ञाच्च ज्ञानस्याप्युपदेशतः। कीर्तिर्जातानुभावाच्च माध्यस्थ्याच्चेति वर्ण्यते ।।२।। विजयोऽयं यथा रामस्ततोऽध्याये निरूपितः। रामस्य कीर्तिरूपे च तद्धाता च तथाविधः।। अतो भगवतो भृत्यास्त्रय एकत्र रूपिताः।।३।।

## दशमस्कन्धे उत्तरार्धे – त्रिंशोऽध्याय:।।

कीर्त्यभावे सुसंसिद्धे कीर्तिहेतून् बल: स्वयम् । त्रिंशत्तमे तथाध्याये चकारेति निरूप्यते ।।१।।

## दशमस्कन्धे उत्तरार्धे – एकत्रिंशोध्याय:।

संपत्तिर्भगवन्मित्रे द्वाभ्यामत्र निरूप्यते । लोकावगतहेतूनामभावात्केवले हरे: ।।१।। एकत्रिंशे तथाध्याये कृष्णमित्रस्य सर्वथा । संपत्त्यभावो वाक्याच्च स्थाप्यते सविशेषत:।।२।। अङ्गत्वेन बलस्यात्र श्रुत्वा लीलां विचक्षण:। निर्विण्णो भगवल्लीलां विशेषेणात्र पृच्छति

।।३।। आम्नायातु विनिर्मुक्ता अनध्याये तथा स्मृताः। अयाज्ये योजिताश्चैव निषिद्धाय च पालिताः।।१।। फलार्थ योजिता दृष्टा यातयामा भवन्ति हि । अन्यथा ज्ञातरूपाश्च अन्यथार्थप्रबोधिताः।।२।। अव्रतैः शूद्रसंकाशैः पातित्याद्याकुले स्थले । अधीताः सर्वथैवैते यातयामा भवन्ति हि ।।३।।४२।।

दशमस्कन्धे उत्तरार्धे – द्वात्रिंदशोऽध्यायः।

द्वात्रिंशे भगवानस्य पुरुषार्थतयोदितः । स्वकर्तव्यं विदित्वैव कृतवानित्युदीर्यते ।।१।। मर्यादया प्रेरिता तु लक्ष्मीः स्थैर्यमिहाश्नुते।

अतोत्र भगवांस्तस्य पृथुकानप्यभक्षयत् ।।२।। दानेऽपि तेजोहानिः स्यात् भार्यादत्तमुपायनम् । तस्या एवं फलं भूयादिति जग्धुं समुद्यतः ।।३।। मुष्टिरेको जगत्तृप्त्यै वनवासे निरूपितः। सर्वं फलं सर्व तृप्त्यापरलोके तथापरः।।४।। तृतीये देवतां दद्यादात्मानं च ततः परे । एवं बुद्ध्या तया दत्तास्ते चेन्निर्विविशुर्हरिम् ।।५।। चतुर्थांशः सिद्धिमेतु तस्या नाधिकमित्युत । लक्ष्मणायां प्रविष्टा श्रीः प्रतिबन्धं चकार ह ।।६।। कामितं दोषरहितं भगवांस्तु प्रयच्छति । अलौकिकत्वात्संपत्तेर्दोषाभावः सुनिश्चितः ।।१।। कामाभावास्त्वस्य सिद्धो न देयं तत्कथंचन । स्वत आगमनं तस्य न भवत्येव भार्यया ।।२।। प्रेषितस्यागतिस्त्वस्य भार्यागतिरियं मता । प्रतिबन्धकता

त्वस्य दाने लज्जादिदोषतः।। तस्मात्तस्या गृहीत्वैतत् तस्यै दास्यामि निश्चितम् ।।३।।५।। शुद्धास्त एव वक्तारो माहात्म्योक्तौ विचक्षणाः। निःस्पृहा ज्ञानसंयुक्ता मोक्षयोग्या हरिप्रियाः ।।१।।३९।।

द[1]शमस्कन्धे उत्तरार्धे – त्रयस्त्रिंशोऽध्यायः।

सात्त्विकप्रकियां तु षड्भिः षडिभःस्त्रयं जगौ । प्रमेयसाधनफलं धर्मास्तत्र निरूपिताः ।।१।। धर्मिणोऽत्र त्रयो वाच्यास्तत्राध्यायत्रयं मतम् । सात्त्विके तु प्रमेये हि धर्मी याद्दग्विधो मतः।।२।। त्रयस्त्रिंशे तथाध्याये प्रथमं स निरूप्यते । सर्वाभीष्टः सर्वसाक्षी सर्वप्रियहितैषणः ।।३।। तीर्थैकगम्यो ज्ञानात्मा गुरुर्मोक्षप्रदः परः। सात्त्विकानामेकमेव साधनं

गुणवर्णनम् ।।४।। सरसस्य श्रुतिश्चापि तदग्रे विनिरूपितम् । ततः फलात्मा स हरिः सर्वाभीष्टप्रपूरकः।।५।। देशकालौ तथा चाङ्गं ततस्तत्रैव तत्त्रयम् । तामसाः प्रोक्ता राजसाश्चैव सात्त्विकाः।।६।। ततोऽध्याये प्रमेयेऽत्र सर्वे सात्त्विकतां गताः। प्रमेयमेतदेवात्र यदा सर्वेऽत्र सात्त्विकाः।। तदा प्रमेयो भगवान्नान्यथेत्युच्यते स्फुटः ।।७।।

### दशमस्कन्धे उत्तरार्धे – चतुस्त्रिंशोऽध्यायः।

चतुस्त्रिंशे साधनानां मुख्यं साधनमीर्यते । कीर्तनं सरसत्वाय स्त्रीभिः स्त्रीणां निरूप्यते ।।१।। सर्वसाधनसंपत्तिः कृष्णानुग्रहपूर्विका ।

तदभावे नैव सिद्ध्येदित्यनुग्रहवर्णनम् ॥२॥ अनुग्रहस्य स्थिरता सुबुद्ध्यैव हरौ भवेत् । माहात्म्यज्ञानतः पुष्टा स्तुत्या कार्यक्षमा भवेत् ॥३॥ सर्वशक्तियुतः कृष्णः श्रोतव्य इति सिध्यति । शक्तीनामप्यभीष्टश्च सज्ज्ञानस्तुतिभावितः ॥४॥ अर्चनात्मा रुक्मिणी स्याच्छ्रवणं तदनन्तरा । सर्वपापक्षयः पूर्वं यस्मादत्र निरूप्यते ॥१॥ एकान्ते च प्रदत्तेति तृतीया स्मृतिरुच्यते । चतुर्थैव चतुर्थी स्यात् द्वितीया पञ्चमी मता ॥२॥ सर्वान्बलवतो दुष्टान् विनिवार्यैव कीर्तयेत् । षष्ठी तु सप्तमी प्रोक्ता सप्तमी तद्विपर्ययम् ॥३॥ नमने पादसंस्पर्शः प्रतिवारं भवेदिति । सख्यरूपा त्वष्टमीयं महती विनिरूप्यते ॥४॥१६॥ स्यमन्तकः कौस्तुभश्च

स्पर्शश्चिन्तामणिस्तथा । चत्वारो मणयः प्रोक्तास्तुत्तुल्याः कृष्णवाजिनः।।१।। साधनस्य च रक्षायाः क्रियायाः सर्वरूपतः। कालस्यापि स्वचेष्टायाः परिग्रह इहोदितः ।।२।।३२।।

दशमस्कन्धे उत्तरार्धे – पञ्चत्रिंशोऽध्यायः ।

पञ्चत्रिंशे सात्त्विकानां फलोत्कर्षो निरूप्यते । सन्मानसंग्रहौ चैव ऋणापाकरणं तथा ।।१।। निरुद्धां हि लोकेस्मिन् दुर्लभं चेति रुप्यते । तदीयत्वं फलं नान्यदिति चोक्तं समासतः।।२।। आत्मीयानां निरोधं हि हरिरत्र करोति हि । अतः फलं पूर्वमेव सिद्धरीत्या तु बोध्यते ।।३।। अद्भुता भगवल्लीला निरोधः फलसूचकः। फलं तु फलतासिद्धयै किमाश्चर्यमतः परम् ।।४।।

[1]दशमस्कन्धे उत्तरार्धे – षट्त्रिंशोऽध्यायः ।

एवं निरोधः सर्वेषां भगवत्कृत ईरितः। स किं साक्षात्सर्वयुक्त्या भगवानन्यथापि वा ।।१।। अन्यथा चेत्कृतोप्येष निरोधो निष्फलो भवेत् । तस्मात्कृष्णस्य सर्वोक्त्या भगवत्त्वं तु साध्यते ।।२।। अतोऽग्रे भगवान् व्यासः षडध्यायीं चकार ह । ऐश्वर्यादिप्रसिद्ध्यर्थं सङ्गतिस्त्वियमेव हि ।।३।। तत्रादौ भगवद्भावसिद्ध्यर्थं युक्तिपूर्वकम्। ऐश्वर्यादीन् षडर्थान् हि षडध्याय्यां निरूप्यते ।।४।। षट्त्रिंशे तु तथाध्याये कृष्णस्यैश्वर्यलक्षणः। अलौकिको लौकिकश्च क्रियाज्ञानविभेदतः।।५।। निरूप्यते यतः पित्रोरैश्वर्यं हृद्गतं भवेत् । अनुभावात्पुरैश्वर्यं

तयोर्हृदयसंहितम् ।।६।। येन स्तुतिः कृता ताभ्यां कृष्णवाक्यात्तु निर्णयः।
तर्थयज्ञसदुक्त्या हि शुद्धान्तः करणो भवेत् ।।७।। ततः कृष्णगुणज्ञाने
तस्येच्छाऽभूदितीर्यते । तथैव देवकी देवी ज्ञात्वा माहात्म्यमुत्तमम् ।।
ऐश्वर्यस्य परीक्षार्थं पुत्राहृतिमुवाच ह ।।८।। कर्ता सर्वप्रविष्टात्मा
नानारूपस्तथा परः। चतुर्धा वेदरक्षार्थं चतूरूपो निरूपितः।।१।।६।।

दशमस्कन्धे उत्तत्तरार्धे – सप्तत्रिंशोऽध्यायः ।

सप्तत्रिंशे हरेर्वीय त्रेधा प्राह सुनिश्चितम् । सर्वेषां सर्वकार्याणि
कृतवानित्युदीर्यते ।।१।। तदेव भगवद्वीर्यं यन्न शक्यं हि लौकिकैः।
न ह्यन्यो भगिनीं दातुमेव शक्तो हरिं विना ।।२।। नापि स्वयं यस्य

कस्य गृहे स्थातुं विभूतये । नापि धर्मं स्वहीनार्थमन्यः कथयितुं प्रभुः।।३।। अनाहूतः स्वयं क्वापि गच्छतीत्यपि नो मतम् । यथा ग्रन्थानुसारेण प्रसङ्गोऽत्र विचारितः ।।४।। कमपाठादिभेदेषु तथा व्याख्यानमिष्यते । उदासीनो हरिर्व्यासः फलसिद्धेरशक्यतः।। ग्रन्थारम्भे तथैवास्मान् बोधयामास माधवः ।।५।। अस्माकं सर्वथा देया हृता नान्यैश्च गृह्यते । वधे भर्तृविहीना स्यात् योग्यश्चायं विशेषतः ।।१।। कार्यार्थं वञ्चनं तस्य न दोषायेति मे मतिः। अज्ञानं स्वस्य दोषो हि कृत्रिमो न हि बाधकः ।। ततो गृहीतपादश्च तेनैवाभूद्धलः स्वयम् ।।२।।११।। भक्ताय

भगवान् कृष्णो भगिनीं दत्तवानिति । किमाश्चर्यं यतः कर्मज्ञाननिष्ठामवाप्तयोः ।।१।। स्वयं गत्वातिमहता समाजेन समावृतः। विप्रक्षत्रिययोः प्रीत्या स्वात्मानं दत्तवान् स्वयम् ।।२।। यथाभिलषितं ताभ्यां सुखं प्राप्तं हरेर्महत् । कृतार्थावपि संजातौ पुनरागमनं ततः ।।३।।१२।।

दशम स्कन्धे उत्तरार्धे – अष्टत्रिंशोध्यायः।

शब्दार्थयोरुत्तमयोः संबन्धो यादृशो मतः। तं विवेचयितुं कृष्णः श्रुतिगीतं चकार ह ।।१।। प्रमाणं ब्राह्मणः प्रोक्तः प्रमेयमपि वै बृहत् । स एव भगवान् कृष्णस्ततो भजनमीरितम् ।।२।।

तत्रोपपत्तिः प्रष्टव्या वाच्यवाचकनिर्णये । अतो राजा श्रुतीनां वै निर्णयार्थमपृच्छत ।।३।। सगुणं चेद्वेदवाक्यं ब्राह्मणास्तत्र च स्थिताः। ततोऽत्र भगवानेव पूज्यो नान्यः कथञ्चन ।।४।। मतान्तरोक्तिरेषा हि सिद्धान्ते वैदिके तथा । अनन्तगुणपूर्णो हि हरिर्ब्रह्म श्रुतिस्तथा ।।५।। त्रयमेकं स्वशक्तिं हि त्रेधा स्वस्मिन्निधाय हि । फलप्रमेयमानत्वं सच्चिदानन्दतां गतम् ।।६।। तथापि साङ्ख्यसिद्धान्ते तथा तदुपजीवके । वैष्णवेऽन्यत्र वा वाच्यं श्रुतिसंग्रहणं यथा ।।७।। अष्टत्रिंशे श्रुतीनां हि यथा वाच्यं बृहद्भवेत् । तदर्थं पूर्वपक्षादिसिद्धान्तफलमीर्यते ।।८।।

## श्रुतिगीताकारिकाः

प्राकृताः श्रुतयः सर्वा भगवन्तमधोक्षजम् । स्तुवन्ति दोषनाशाय तत्राविष्टो भवेद्यथा ।।१।।१४।। सत्यो हरिः समस्तेषु भ्रमभातेष्वपि

स्थिरः। अतः सन्तः समस्तार्थे कृष्णमेव विजानते ।।२।।१५।। कथानत्योक्तिहृदयाः साधनानि न कुर्वते । साक्षात्ते पादसंश्लिष्टास्ते किं वाच्या महाशयाः।।३।।१६।। कृष्ण एव सदा सेव्यो निर्णीतः पञ्चधा बुधैः। शरीरदः प्रेरकश्च सुखद शेषसत्पदः।।४।।१७।। कर्मरूपं हरिं केचित् सेवन्ते योगरूपिणम् । तेभ्योऽप्यक्षररूपस्य सेवकाः संमताः सताम् ।।५।।१८।। सर्वत्र भगवांस्तुल्यः सर्वदोषविवर्जितः। कीडार्थमनुकुर्वन् हि सर्वत्रैव विराजते ।।६।।१९।। गुप्तानन्दा यतो जीवा निरानन्दं जगद्यतः। पूर्णानन्दो हरिस्तस्माज्जीवैः सेव्यः सुखार्थिभिः ।।७।।२०।। कृष्णे हरौ भगवति परमानन्दसागरः। वर्तते नात्र संदेहः कथा तत्र नियामिका

।।८।।२१।। असत्सङ्गो न कर्तव्यो भक्तिमार्गस्य बाधकः। देहे ह्यनुगुणे कृष्णे नेन्द्रियाणां प्रियं चरेत् ।।९।।२२।। सर्व एव हरेर्भक्तास्तुल्या यान्मन्यते हरिः। अतः कृष्णो यथात्मीयान्मन्यते भजनं तथा ।।१०।।२३।। ज्ञानमार्गो भ्रान्तिमूलस्ततः कृष्णं भजेद्बुधः। प्रवर्तकं ज्ञानकाण्डं चित्तशुद्ध्यै यतो भवेत् ।।११।२४।। भ्रान्तिमूलतया सर्वसमयानामयुक्तितः। न तद्विरोधात् कृष्णाख्यं परं ब्रह्म त्यजेद्बुधः।।१२।।२५।। जीवानां ब्रह्मरूपत्वाद्दोषा अपि च मानसाः। जगच्च सकलं ब्रह्म ततो दोषः कथं हरौ ।।१३।।२६।। सर्वथा सर्वतः शुद्धा भक्ता एव न चापरे । अतः शुद्धिमभीप्सद्भिः सेव्या भक्ता न चापरे ।।१४।।२७।। सुवर्णप्रतिमेवासौ सर्वानन्दमयोऽधिराट् । सर्वसेव्यो नियन्तां च निर्दुष्टः सर्वथैव हि

।।१५।।२८।। सर्वभावविनिर्मुक्तः पूर्णः क्रीडार्थमुद्गतः। निमित्तं तं समाश्रित्य जायन्ते जीवराशयः।।१६।।२९।। नियन्ता जीवसंघस्य हरिस्तेनाणवो मताः। जीवा न व्यापकाः क्वापि चिन्मया ज्ञानिनां मताः।।१७।।३०।। नामरूपप्रपञ्चं हि देवतिर्यङ्नरात्मकम् । कृष्णादेव समुद्भूतं लीनं तत्रैव तन्मयम् ।।१८।३१।। नृणां दुर्गतिमालोक्य ये सेवन्ते दृढव्रताः। कृष्णं तद्भूकुटिः कालो न तान् हन्ति कदाचन ।।१९।।३२।। अदान्ते मनसि ज्ञाते योगार्थं न यतेद्बुधः। गुरुसेवापरो भूत्वा भक्तिमेव सदाभ्यसेत् ।।२०।।३३।। पुत्रादीन् संपरित्यज्य कृष्णः सेव्यो न तैः सह । तत्सुखं भगवान् दाता ते तु क्लिष्टेतिदुःखदाः।।२१।।३४।। परिभ्रमन् तीर्थनिष्ठो गुरुलब्धहरिस्मृतिः। न सेवते गृहान् दुष्टान् सद्धर्मात्यन्तनाशकान् ।।२२।।३५।।

सद्बुद्ध्या सर्वथा सद्भिर्न सेव्यमखिलं जगत् । भ्रान्त्या सद्बुद्धिरत्रेति सन्तं कृष्णंभजेद्बुधः ।।२३।।३६।। खपुष्पादिसमत्वाद्धि मिथ्याभूतं जगद्यतः। अधिष्ठानाच्च सद्भानं तं कृष्णं नियतं भजेत् ।।२४।।३७।। कालादितृणपर्यन्ता न सेव्या मुक्तिमिच्छता । दोषत्याजनशक्तो हि सेव्यो दाता गुणस्य च ।।२५।।३८।। जीवेषु भगवानात्मा संछन्नस्तेन तत्र न । भजनं सर्वथा कार्यं ततोऽन्यत्रैव पूजयेत् ।।२६।।३९।। सुखसेवापरो यस्तु स आनन्दं हरिं भजेत् । अन्यथा सुखसंप्रेप्सुः सर्वथा दुःखमाप्नुयात् ।।२७।।४०।। कृष्णानन्दः परानन्दो नान्यानन्दस्तथाविधः। वेदा अपि न तच्छक्ताः प्रतिपादयितुं

स्वतः॥२८॥४१॥ माहात्म्यं बहुधा ज्ञात्वा जीवानां च गतिं पराम् । सर्वत्यक्त्वा विधायैतन् नित्यं कृष्णं स्मरंश्चरेत् १।४६

दशमस्कन्धे उत्तरार्धे – एकोनचत्वारिंशोऽध्यायः।

एवं कृष्णस्य मूलत्वे संदिहानस्य संशयः। निवारितोऽतियत्नेन येन कृष्णः परः स्मृतः॥१॥ व्यवहारस्तथैवात्र कृष्णे पर्यवसानतः। सर्वेन्द्रियाणां ग्राह्यत्वं श्रुतीनां हि यथोदितम् ॥२॥ भजनीयगुणे त्वत्र संदेहः कश्चिदुद्गतः। तन्निवारयितुं प्रश्नः पुनः राज्ञा निरूप्यते ॥३॥ पूर्वाध्यायो यशोव्यक्त्यै श्रियै चायमुदीरितः । अतः श्रियं सदा कृष्णे नित्यामाहाव्ययां क्वचित् ॥४॥ यथानन्दो न सर्वत्र

तथा श्रीरपि देवता । तथात्वं दूषणं लोके भ्रान्तबुद्धौ निरूपितम् ।।५।। अतोऽत्र भजनीयार्थं लक्ष्मीनिर्णय उच्यते । एकोनचत्वारिंशे च तत्प्रसङ्गात्कथान्तरम् ।।६।। शिवादिसर्वदेवानां दातृत्वमविचारतः। विचारेण तु दातृत्वं कृष्णस्यैव विशेषत्ः।।७।। अविचारितदानेन स्वयं दातापि नश्यति । संप्रदानस्य का वार्ता तस्माच्छ्रीशो न तत्प्रदः।।८।। दुष्टैव श्रीरन्यगता शुद्धा कृष्णैकतत्परा । कृष्णमेव ततो वाञ्छेन् न श्रियं बुद्धिमान् क्वचित् ।।९।।

दशमस्कन्धे उत्तरार्धे – चत्वारिंशोऽध्यायः।

एवं दातृत्वसंदेहः कृष्णस्य विनिवारितः। अनेनैव महत्त्वं च हरौ निर्धारितं भवेत् ।।१।। तथापि स्पष्टमध्याये चत्वारिंशे निरूप्यते ।

माहात्म्यं द्विविधं लोके प्रमाणाच्च प्रमेयतः।।२।। वेदानां मूलरूपेण प्रथमं विनिरूप्यते । द्वितीयं च प्रमेयेण हरिणैव निरूपितम् ।।३।। ज्ञानशक्तिश्च पूर्णात्र कियापर्यवसायिनी । मूलत्वात्सर्वसहनं जनकस्येव रूप्यते ।।४।। यदा गुणा भगवतश्चत्वारो विनिरूपिताः। तदावशिष्टद्वितयं स्वयमेवावदच्छुकः ।।५।। चक्रं शङ्खस्तथा खड्गश्चर्म शार्ङ्गं गदा तथा । बाणः पद्मं तथान्यानि मुसलाद्यायुधानि हि ।। मूर्तिमन्ति हरेः पार्श्वे तिष्ठन्ति परितः सदा ।।१।।५७।।

दशमस्कन्धे उत्तरार्धे – एकचत्वारिंशोऽध्यायः।

एवं सर्वान् समुत्य क्रीडत्यसमाकमीश्वरः। क्रीडायां प्राप्तसंसारः स्त्रीणामपि निवार्यते ।।१।। ज्ञानं निरूप्य वैराग्यं निरूपयितुमुद्यतः।

अद्भुतत्वाच्चरित्रस्य रागलीला निरूप्यते ।।२।। स्वार्थं रतिः पूर्वमेव भगवत्त्वान्निवारिता । स्त्रीणां तु रागसंप्राप्तिस्ततोऽत्र विनिवार्यते ।।३।। एकचत्वारिंशेऽध्याये भक्तानां सुखसिद्धये । परमोत्सवलीलां हि श्रीशुको वर्णयन्मुदा ।।४।। कुररी चक्रवाकोऽब्धिश्चन्द्रमा मलयानिलः। मेधकोकिलकेल्यद्रितन्नद्यो हंस एव च ।।१।। दशधा भगवत्स्नेहैरुक्ताः स्त्रीभिः स्वभावतः। मनसैव तिरोधानमुक्त्यैवोक्तं न पूर्ववत् ।।२।। वाचकेऽपि तिरोधानं वाक्यैरेव निरूपितम् । विद्यमानेऽतिसंभोगसौख्यदेऽपि विशेषतः।।३।। तत्सङ्गलालसाः प्रोक्ता दृढासक्तिप्रसिद्धये । आसक्तिर्गृहकार्यादिनिद्रादिविनिवृत्तये ।।४।।। स्वधर्मान् स्वप्रियं चापि कल्पयित्वाखिलेषु हि । बहिस्तत्त्वं

निरीक्ष्यैवं प्रलपन्त्यस्तथा जगुः।।५।। यदा देहेऽतिचिन्ता स्यात् धातुवैषम्यमेववा । भयादिना विशेषेण तदा निद्रा न जायते ।।६।। यदाङ्गेषु समस्तेषु तापोऽनिर्वृत्तिरेव वा । तदैकत्र जनः स्थातुं न शक्नोति कथंञ्चन ।।७।। ज्ञानशक्तिः क्रियाशक्तिर्भक्तियोगस्तथैव च । मायावैभवकालौ च सतां हितकरौ तथा ।।८।। पञ्चैते हरिसम्बद्धा यस्यान्तर्हृदये सदा । विराजन्ते स्वभक्तेषु भक्तोऽनिर्वृत उच्यते ।।९।।१५।। बुद्धिः प्रपत्तिः संबन्धो द्विविधोऽपि विधेर्बलम्। प्रमेयबलमित्यासां षोढा कृष्णे निरूपिता ।।१।। एकैकोऽपि महत्पुण्यसाध्यः षण्णां तु का कथा ।अतस्यः प्रशंसा हि तासां वक्तु क ईशते ।।२।२७।।

अर्थकामौ तथा धर्मश्चिरजीवित्वमेव च । एतत्साधारणं प्रोक्तं वीर्यं तु क्षत्रियत्वत:।।१।३९।। अहं निरुद्धो रोधेन निरोधपदवीं गत:। निरुद्धानां तु रोधाय निरोधं वर्णयामि ते ।।१।। हरिणा ये विनिर्मुक्तास्ते मग्ना भवसागरे । ये निरुद्धास्त एवात्र मोहमायान्त्यहर्निशम् ।।२।।

## एकादशस्कन्धे – प्रथमोऽध्याय:।

अथैकत्रिंशताध्यायैर्मुक्तिरेकादशे द्विधा । ब्रह्मभाव: कृष्णयोगो हरेर्धर्मैस्तथाज्ञया ।।१।। अविद्यापञ्चपर्वा हि तन्नाशे प्रथमा भवेत् । प्रकृत्यतिक्रमे चान्या ततोऽध्यायास्तथा द्वये ।।२।। जनकश्चोद्धवश्चैव सात्त्विको राजसस्तथा । पुष्टिमार्गस्य मुख्यत्वाद् विपरीता गतिर्गुणै:

।।३।। मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः। जीवब्रह्मविभागेन द्विधा द्वयमुदीर्यते ।।४।। तामसा राजसाश्चैके तत आद्ये द्वयं मतम्। अंशाश्च भगवाँश्चेति द्वितीयोऽपि द्विधा मतः।।५।। ततः पञ्चभिराद्या स्याच् चतुर्विंशतिभिः परा। एकैकेनेश्वरस्योक्ते त्याज्यांशाभावतः परे ।।६।। ममाहम्मतिनाशार्थं प्रक्रियाद्वितयं मतम् । तयोरभिनयः पश्चात् कृतो भगवतेति च ।।७।। ततश्च प्रथमेऽध्याये बीजद्वयमुदीर्यते। ब्रह्ममुक्तिर्निजेच्छातो वैराग्येणेतरस्य च ।।८।। चतुर्धा मुक्तिपक्षश्च तदिच्छात इति स्थितिः। एकैकेन त्रिभिश्चेति कायवाङ्मनसा कृतम् ।।९।। अधिकारश्च मार्गश्च नेश्वरेण विचार्यते। अन्तःस्थितं यदा ब्रह्म तदा योग उदीर्यते । इन्द्रियान्तःप्रवेशार्थं तथा साङखयं तथापरम् ।।१।।७।।

## एकादशस्कन्धे – द्वितीयोऽध्यायः।

वैराग्यहेतौ संसिद्धे हृदये रागसम्भवात् । आन्तरस्य बलिष्ठत्वान् न वैराग्यं फलिष्यति ।।१।। पूर्वं गुरुस्तथा शास्त्रं वक्तव्यं मुक्तिहेतवे । गुरुर्हरिर्भक्तिमार्गसेवको विहितो महान् ।।२।। भगवद्वचनं शास्त्रं सेवकानां तु सेवकः। प्रपन्न एवाधिकारी शास्त्रमार्गेण यो भवेत् ।।३।। केवलेन निरोधेन निरुद्धा येन ते तथा । ज्ञानेन सहितौ तस्माद् वसुदेवोद्धवौ मतौ ।।४।। वसुदेवस्य संसिद्धं बीजं च ज्ञानकर्मणि । शास्त्रेणाचार्यराहित्यान् न ज्ञानं फलति स्फुटम् ।।५।। उद्धवस्य प्रपत्तिस्तु महती लौकिकत्वतः। गोपिकाज्ञानसन्देशस्तस्या एव तु पोषकः।।६।। निरोधः सुदृढः कृष्णे ममतासहितो महान् । मतोऽत्र वसुदेवस्य ममतानाशनं यथा ।। अहन्ता तूद्धवस्यापि यथा नश्येत् तथा कथा ।।७।।

## एकादशस्कन्धे – तृतीयोऽध्यायः ।

अत्राधिकारहीनानां तृतीयाध्याय ईर्यते । अनुकम्पोऽधिकारो वा चतुर्भिः सम्भविष्यति ।।१।। दुष्टप्रवाहविज्ञानं तरणं हेतुभिः क्रमात् । ज्ञानकर्मपरिज्ञाने तृतीयेऽर्थचतुष्टयम् ।।२।। द्विपदां भोगसंसिद्ध्यै चतुष्पादो निरूपिताः। ते स्थिराः शङ्कुसन्नद्धाः स द्विपाद्भिः स्थिरीकृतः।।३।। मायाशक्तिर्भगवतो नात्र कार्या विचारणा । समाधौ तु तथा भानात् प्रयोगस्तु विचार्यते ।।१।। विचारे भगवद्वाक्यं लक्षणं कार्यगोचरम् । प्रतीतिश्चाप्रतीतिश्च साधिष्ठानस्य तद्धि हि ।।२।। सुवर्णजलवत् कार्ये प्रक्रियेयं पुराणगा । तया सह कृतिः क्वापि च्छादनं सा सतोऽपि वा ।।३।। निःस्वरूपस्य कार्यस्य तद्धर्माणां सहैव वा । सदिव स्फुरणं यस्मात् त्रयं मायेति शब्द्यते

।।४।। मार्गत्रये हरेः स्फूर्तिस्ततोऽन्यन् मायया कृतम् । प्रतीतिरपि मिथ्येति केचिद् धर्मविचारकाः।।५।। शास्त्रतो निर्णयस्तस्य वस्तुनो मायिकस्य च । ज्ञानेऽपि स्फुरणं यस्य तद्रूपं सत्त्वमुच्यते ।।६।। केवला लौकिकी स्फूर्तिस्तावन्मात्रशरीरिणी । अस्थिरा मूलराहित्यात् सा मायेति निगद्यते ।।७।। मात्रप्रयोगो यत्रास्ति तत्रैकस्यैव रूपणम् । उभयं तु हरेः कार्यं द्वितीये करणं तु सा ।।८।।

द्वितीयमात्रकरणे काशकृत्स्नमतं स्थितम् ।।८।।३।।

श्रीरूपत्वाद् धृतं रूपमाकृतिः स्त्री निगद्यते । स्वभोगाय तथा दैत्यमोहाय च सदा हि सा ।।१।। प्रभुसेवकरीत्या हि भक्तिमार्गे निरूपणम् । श्रुतीनामन्यथारीतिर्न दूषणमिहाण्वपि ।।२।। बीजसंस्कारकृपया नान्योन्याश्रयणं मतम् । सर्वे मार्गा विलीयेरन्

सा चेत् तत्र तथा न हि ।।३।। अंशपक्षे न दोषोऽस्ति ह्यवस्थायां तु सा रतिः। मर्यादापुष्टिमार्गेण मुक्त्यर्थं निन्द्यते परम् ।। अतस्तद्विषयोल्लङ्घ्यः प्रष्टव्यश्चेत् तदुच्यते ।।४।। अयथाज्ञानता जातं वैदिकं स्मार्तमेव च । पौराणं च ततो जातं फलं गृहवदेव हि ।।१।। अक्षय्यतृतीयाश्राद्धादि तथानन्तव्रतादि च । समर्पितं प्रियं विष्णौ ततोऽपि फलितं तथा ।।२।। अतो नश्वरमित्युक्तं पृथग् भक्तिफलात् कमात् । सतुल्यातिशयध्वंसमन्तःकरणदोषतः।।३।। ज्ञानभक्तिफले मोक्षे नायं दोषस्ततो भवेत् । ऐश्वर्यसहितेऽप्येवमिति दृष्टान्तसङ्ग्रहः ।।४।। स्पर्धासूयायुतो लोको मण्डलाधिपगोचरः। लोकद्वयफलं तस्मादेवमेवेति

निश्चयः ।। अतो मोक्षफले हेतुर्मूलभूतस्तमाह हि ।।५।।
मार्गान्तरस्थितो ह्यत्र बोधको न स्वमार्गगः। प्रपञ्चितं तत्
प्रथमे शुका वक्ता न नारदः। सप्तमेऽत्र च कृष्णस्य दर्शनार्थी
तथापि तु ।।१।।२१।। नारायणः परो यस्य परत्वं कीदृशं
मतम् । मार्गान्तराच्चेदुत्कर्षो विषयो ह्येक एव हि ।।१।।
प्रकारश्चेद्धर्मपरो विषयः कीदृशः परः। उत्कृष्टबुद्धिः सिद्धैव
ततो निष्ठावशिष्यते ।।२।। तद्धर्माणां न निष्ठात्वमतः पृच्छति
संशयात् ।।३।।३३।।

## एकादशस्कन्धे–चतुर्थोऽध्यायः।

मायातत्करणज्ञानकर्मनिर्णयबोधनैः । शुद्धचित्तः शुद्धलीलां हरेः पृच्छति मुक्तये ।।१।। तृतीयेयं समाख्याता कक्षा हरिकथा सदा । श्रोतव्येति यतश्चित्तं सर्वथा तत्परं भवेत् ।।२।। स्त्रीभिः कामजयो यस्य कोधस्याप्यर्चनेन हि । उत्कर्षाधायकत्वेन ह्युभयोरित्यचिन्त्यता ।।३।।१६।।

## एकादशस्कन्धे – पञ्चमोऽध्यायः ।

वक्ता श्रोता तथा वाच्यं त्रिभिरुक्तं विशेषतः। लोके सर्वत्राप्रवृत्तौ प्रामाण्यं कुण्ठितं भवेत् ।।१।।

अतस्तत्साधकोऽध्यायश्चतुर्थोऽयमुदाहृतः। देशकालस्वभावानां निर्धारक उदाहृतः।।२।। अस्यार्थो भगवद्देशे स्थित्वालौकिकगीतितः। निराकृत्यन्यथावादान् शुद्धः कृष्णंन भजेदिति ।।३।।

इति पूज्यपाद श्रमद्वल्लभाचार्यविरचिता: श्रीमद्भागवतकारिका: समाप्ता: ।।